A/C. NO.	NEW	219	OLD	195
FOLIO	124			

TITLE

1. पक्षतावादः ।
2. धर्मितावच्छेदकवादार्थः ।
3. नव्यमतवादार्थः ।

पक्षतावाद

(गादाधरी)

श्रीगुरुराजो विजयते ॥ मूले व्याप्तिपक्षधर्मतयोः संगत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्या
नुकूलत्वरूपसंगतिं प्रदर्शयन्ननुव्याख्यानं चरमित्यादिमूलमवतारयति । अनुमितीति ॥ अनुमितिलक्षणं ।
अनुमितिस्वरूपं । यदेकं कार्यं । तदनुकूलत्वसंगत्या । तत्प्रयोजकत्वरूपसंगत्या । प्रयोजकत्वं च कारणताव
च्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेन अनुमित्यजनकत्वेपि न
क्षतिः । [illegible]पि पक्षताया न कारणतावच्छेदकपरकत्वं तामनं च भाव्यपर्वतादिः वृत्तित्वस्य नैवानु न
मितिजनकत्वात् । तथापि पक्षताया अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मवृत्तिता
याश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्यैककार्यानुकूलत्वमक्षतमेवेति ध्येयं । निरूपयितुमिति ।

१ निरूपणं प्रतिपत्त्यनुकूलो व्यापारः। एवं च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्र
तिपत्त्यनुकूलत्वेन तन्निरूपणमसङ्गतमेवेति मूले पक्षतानिरूपणेपि पक्षधर्मतां निरूपयितुमित्यस्य
नासं[illegible]तिः। पक्षेधर्मत्वं यस्येति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेष[illegible]रूपपक्षतापरमिति
केचित्। त[illegible]न्त्यं। तथाहि लिखनसंक्षेपनिर्बन्धेनादीधितिकारस्य पक्षतानिरूपयितुमित्यस्योपेक्षायां
मूल बीजाभावात्। व्याप्तीति॥ व्याप्तिनिरूपणानन्तरमिति पाठः। [illegible]ण। व्याप्त्यनन्तरमिति पाठश्च तत्र
इकाराभावात्संक्षेपसादीत्युपेक्ष्य प्रत्यक्षविषयादिरीत्या प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थकारकस्य
तथाविधलिखनस्यासङ्गतेः। त[illegible]ति। मूले तत्पदं पक्षधर्मतापरं सा परामर्शस्य घटकत्वं अन्वयश्चास्य पक्ष

त्वमित्यत्रैवान्वयं । संदिग्धेत्यादिमूलग्रंथस्य संदिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूत
धर्मसंदेहवत्त्वं तादृशसंदेहपर्यवसितं पक्षत्वमित्यर्थः तत्र साध्ये धर्मत्वनिवेशनमफलं धर्मपदं साध्यवाचकं यस्मिन्नु
संदिग्धं साध्यधर्मत्वं बहुव्रीहिबलात्साध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ साध्यसंदिग्धस्व धर्म
त्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य चाप्रसिद्धिः स्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत्तु ।
एवं साध्यकोटिकसंशयनिवेशो साध्यं पक्षवृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यादिसंशयासंग्रहः । संत्ता
तादृशसंशयोपादाने च पक्षः साध्यवान्न वेत्यादिसंशयादनुमित्यनुपपत्तिरतो धर्मितांशपरित्यज्य केवलान्वयिग्रं
थमणिकृतैव वक्ष्यमाणं तथाविधसकलसंशयानुगमप्रकारं दर्शयति यत्रेति यत्र यद्धर्मावच्छिन्ने सस्यम्यर्थो

(नु नु प्रथमविग्रह एवाश्रीयते धर्मपदं तु प्रस्यार्थस्य विषयं [redacted] स्य प्रकारतारूप स्य सूचकतया सार्थकमित्यतीस्तत आह ॥३)

निर्णयान्वयिविशेष्यत्वं साध्यस्य साध्यतावच्छेदकावच्छिन्नस्य षष्ठ्यर्थः प्रकारित्वं तस्यापि निर्णये न्वयः तत्र तथ
२ र्मावच्छिन्ने सप्तम्यर्थोऽनुमित्यन्वयिविशेष्यत्वं तादृशासंबंधेन साध्यानुमितौ तादृशासंबंधावच्छिन्नसाध्यताव
च्छेदकावच्छिन्नविधेयताकानुमितिजनकीभूतत्वमर्थः पक्षविशेष्यकसाध्याभावविशिष्टबुद्धाविव साध्यधर्मिकप
क्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः साध्यवान्नवेति निश्चयस्य प्राचीनमते प्रतिबंध
त्वात्साध्यं पक्षवृत्ति न वेत्यादिसंशयसंग्रहः एवं च शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगादिसंसर्गा
वच्छिन्नशुद्धवन्हित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंस
र्गावच्छिन्नवन्हित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबंधकताकसंशयो हेतुरिति पर्यवसितं। तादृश

निश्चयप्रतिबध्यत्वस्य यथाश्रुते घटादिविषयकसमूहालंबनात्मकवह्न्यादिनिश्चयप्रतिबध्यघटादिसंशयसाधारणत्वात् तादृशनिश्चयत्वावच्छिन्नप्रतिबंधकतानिवेशः अवच्छिन्नत्वं चान्यूनवृत्तित्वं नतुस्वरूपसंबंधविशेषः तेन वन्हिसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनंतर्भाव्य वन्हिमान्महानसीयवन्हिमानित्यादिसकलज्ञानसाधारणवन्हित्वाद्यवच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबंधकताकल्पनान्महानसीयवन्हिमान् वन्हिसामान्याभाववान्वा पक्ष इत्याद्याकारकसंशयं प्रति महानसीयवन्हित्वाद्यवच्छिन्नप्रकारताकनिश्चयत्वेनाप्रतिबंधकत्वेपि न तथाविधसंशयस्य महानसीयवन्हित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रत्ति प्रतिबंधकतावच्छेदककोटौ वन्हित्वाद्यवच्छिन्नप्रकारताकत्वादेर्निविष्टत्वेपि वन्हिमानित्याद्यनुमितौ महानसीय

३ वह्निमान्नवापक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः इत्थं चाहार्यस्य भ्रमत्वज्ञानास्कंदितस्य च निश्चयस्या
ना तिबंधकतया नाहार्यत्वं भ्रमत्वज्ञानानास्कंदितत्वं च निश्चयविशेषणं देयं अतो न तथाविधनिश्चयत्वान्यूनवृ
त्तिप्रतिबंधकताप्रसिद्धिः पर्वतो वा कामादे इत्यादेः कस्यापि सानर धर्मान्तरावच्छिन्नविशेष्यताकान संस
र्गकान्यधर्मावच्छिन्न प्रका कनिश्चयसाधारणसंयोगादिसंसर्गक वह्नित्वावच्छिन्नप्रकारकनिश्चयत्वान्यूनवृ
त्तिप्रतिबंधकताकत्वं न संभवतीति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादिप्रकारत विशेष
णं उपनीतभानान्य बाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्य[redacted] निवर्तनीयतया भ्रमत्वज्ञानास्कं
दितस्य च तस्यानुमित्यविरोधितया तथाविधबाधदशायामनुमित्यापत्तिरतः संशयत्वनिवेशानं नयपक्ष

(१ तादृशप्रतिबंधकतानिरूपितप्रतिबध्यताशालितेन किंवा साध्यतानप्रतिबंधकनिश्चयत्वेन ॥१)

साध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्य संशयत्वस्य दुर्वचतया पुनरुक्ताननुगमितादवस्थ्यमिति वाच्यं
बाधनिश्चयनिवर्तनीयत्वस्यैवात्र संशयपदेन विवक्षणीयत्वात् केवलान्वयिनि साध्यपक्षनिष्ठाभावप्रतियोगित्वनि
श्चय एव सुलभो बाधः एकविधबाधोपादानेनैव विविधसंशयानुगमसंभवात् तदननुगमो न दोषः । अ- गमस्या
पि कथंचित्संभवाच्च [illegible]नु पक्षसाध्यवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षितमिति नाननुगमः साध्यं पक्षवृत्ति न
वेति साध्यविशेष्यकसंशयस्यापि तथात्वादिति [illegible] तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनि
ष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात् [illegible]ये केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्यतादृशसंशयादेवानु
मित्युत्पत्त्या तथाविधसंशयासंग्रहेण न दोषायेति [illegible] प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयस्य

(।।५ तादृशप्रतिबंधकताकत्वेन [illegible] न्यतः कोटिधर्मिणि उभयकोट्यवगाहित्वं निरुच्य अननुगमो भारेव स्वभाववान् पर्वतो घटवांश्चेति संशा

४ केवलान्वयिग्रंथे मणिकृतैव संगृहीतत्वात् तद्विरोधात् [illegible] तादात्म्यसंबंधेन वाच्यसाध्यक
प्रमेयपक्षकस्थले तादृशसंज्ञायाः प्रसिद्धिः तादात्म्यसंबंधेन पक्षसंबंधत्वाभावरूपकोट्यप्रसि
द्धेः [illegible] साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंज्ञापस्य पक्षता[illegible]कस्थले पक्षतावच्छेद[illegible]सामानाधिक
रण्यमात्रेणानुमितेरुद्देश्यत्वे पक्षता[illegible]च्छेदकावच्छेदेन वर्तमानभेदप्रतियोगित्वकोटिकसंशयस्य [illegible]साध्य
वत्तानिर्णयप्रतिब[illegible] तथा पक्षत्वमंगीकर्तव्यं तच्च [illegible] प्रमेयत्वावच्छेदेन वर्तमानभेदाप्र
सिद्ध्या कोट्यप्रसिद्धेरिति वाच्यं [illegible] तत्र पक्षतावच्छेदकावच्छेदेन वर्तमान
स्य घटपटोभयत्वावच्छिन्नभेदस्यैव प्रसिद्ध्या साध्यतावच्छेदकावच्छिन्ने तादृशभेदप्रतियोगित्वकोटिकसं

शयस्य पक्षतात्वसंभवात् पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताक त्वतादृ
स्यसंबंधावच्छिन्नप्रतियोगिताकत्वोभयतावच्छिन्नतदभावकोटिकसंशयस्यपक्षतात्वोपगमा [illegible] थ
साध्यकव्यतिरेक्यनुमानस्थले साध्यपक्षवैशिष्ट्या[illegible]गाहिसंशयानुपपत्तेः तत्रसाध्यात्मकाभावप्रतियो
गिनिपक्षवृत्तित्वादिसंशयस्यैवपक्षतात्वस्योपगंतव्[illegible] तथा संशयपदेनसाध्यपक्षवैशिष्ट्या[illegible]गाहित्वनिवेशा
नासंभवइति [illegible] न्हिव्याप्यसाध्यकस्थले महानसाय[illegible]न्हितावच्छिन्नसाध्यकस्थलेचवाह्निमा[illegible]वापस
इत्यादिसंशयस्यपक्षतात्व[illegible]संगः साध्यवत्तानिश्चयनिवर्त्यत्वात् नच सिद्धसाधनस्थ[illegible] अनुमितिवार
णमेवपक्षताहेतुत्वकल[illegible] ले एवंचाकर[illegible]शयस्यानुमितिहेतुत्वोपगमेपि सिसिधिदशायामनुमित्याप [illegible]से
भवात् तस्यपक्षताहेतुम[illegible]मेवेति[illegible]साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिनुप[illegible]याव

गान्तिसाध्यसंदेहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथाबाधसाधारणरूपेण पक्षतात्वोपगमेपि सिद्धिकालेऽनुमि
५ तिवारणसंभवात् बाधवारकसंशयत्वनिवेशस्यापि निष्प्रयोजनकत्वापत्तेः न च तादृशसंशयस्य वह्निव्याप्याभाववत्तानि
श्चयरूपबाधाप्रतिबध्यतया नातिप्रसंग इति वाच्यं वह्निव्याप्याभावाभाववान्पर्वतः पर्वतो वह्निमान्नवेति संशयस्य तादृशबा
धनिश्चयप्रतिबध्यतया तावतापि तद्वारणासंभवात् वस्तुप्रकृतसाध्यतावच्छेदकावच्छिन्नविषयिताघटितधर्मावच्छिन्नप्रतिब
ध्यतानिवेशान्नोक्तातिप्रसंगः वह्न्याभावविशिष्टज्ञानत्वाद्यवच्छिन्नायाः वह्निव्याप्यवत्तानिश्चयप्रतिबध्यतायाः अवच्छेदककोटौ व
ह्निव्याप्यत्वाद्यवच्छिन्नविषयतायाः अनंतर्भावादिति। तच्च। वह्न्यभावादिसाध्यकस्थले वह्निमान्नवेत्यादिसंशयसंग्रहप्रसंगात्।
वह्निविशिष्टबुद्धित्वाद्य।वच्छिन्नायाः वन्ह्यभावादिनिश्चयप्रतिबध्यतायाः अवच्छेदकगर्भे वन्ह्यभावत्वाद्यवच्छिन्नविषयितायास्
निवेशात्। यत्र च वह्निव्याप्यत्वावच्छिन्नस्यैव पक्षत्वं साध्यत्वं च तत्र वह्निव्याप्यो वह्निमान्नवेति संशयवारणस्याशक्यत्वात्। वस्तु
साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयिताघटितधर्मावच्छिन्नत्वेन प्रतिबध्यतायाः विशेषणतया वह्निव्याप्यवत्ताज्ञानं ति

वन्ह्यभावादिनिश्चयत्वेनाप्रतिबंधकतया तद्विषयिताया: साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकत्वविरहेण नातिप्रसंग इति तदपि न
तावत्तापि महानसीयवन्हित्वाद्यवच्छिन्नसाध्यकस्थले महानसीयवन्ह्यभावाभाववान्पर्वत: सवन्हिमान्नवेति संशयवारणासंभवा
त्। अत्रोच्यते॥ संशयत्वं निष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतात्वालितं ज्ञानभेदेन विषयितान भेदा
भ्युपगमात् संशयनिष्ठवन्हिमत्पर्वतादिविषयिताया अपि प्रत्येकं निश्चयवृत्तित्वात् प्रतिबंधकतावच्छेदकघटकत्वोपपत्ते:। वह्न्यादि
साध्यकस्थले वह्न्यभाववान्पर्वतो घटवान्वेति आकारकसंशयस्य तादृशधर्माक्रांतस्य साध्यवत्तानिश्चयप्रतिबध्यस्य वारणाय सा
ध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यता निवेशनीया। घटादिमत्ताज्ञानत्वावच्छिन्नप्रति
बध्यताया: अतथात्वान्नातिप्रसंग: अत्र वह्न्यभाववान्नवेति संशयस्य पक्षतात्वमिष्टमेव तस्य वन्हि: पक्षनिष्ठाभावप्रतियोगि
नवेति संशयसमशीलत्वात् स्वनिष्ठविषयितायां च बाधप्रतिबध्यतावच्छेदकत्वं विशेषणीयं तेन वन्हिव्याप्यसाध्यकस्थले च वन्हि

२ (प्रतिबध्यतैक्यविवक्षणे तत्संग्रह: स्यादिसुकरी निरनुसता) २

त्रि॰टी॰ ग्ना॰ (४॥ यद्यपि स्वातंत्र्येण तादृशनिश्चयनिवर्तकत्वनिवेशनेनापि उक्त [redacted] संशयवारणसंभवादवच्छेदकधर्मस्य विवक्षा विफला तथापि वह्निव्या प॰
(२॥ स्वनिष्ठविषयतायां बाधप्रतिबंध्यतावच्छेदकत्वविशेषणे च स्वाभाववान् घटत्वान्नेत्यादौ व्याप्यत्वाभावेन ॥२) प्याभाववत्साध्यकस्थले वह्निव्याप्याभाववानभाव
२ मान्नवा पक्ष इत्येतादृशसंशयस्य व्युदासः तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथक्भानेपि संशयत्वघटकीभूतस्वनिष्ठवह्नि
मत्पक्षविषयितायां वह्निव्याप्याभाववन्निश्चयप्रतिबध्यतावच्छेदकत्वविरहात् एवं च यत्र धूमवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाव
वान् पर्वत इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्नवा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानि
श्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनमिति सर्वं ध्येयं । एतेन अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण
कोटिद्वयावगाहिनो निश्चयस्य अवच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेपि निरुक्तसंशयत्वेन पक्षतात्वमिति संक्षेपः अथ
(स्वमते महानसीयवह्निसाध्यके वह्निमान्नवेति संशयवारणाय साध्यतावच्छेदकावच्छिन्नप्रकारताशालिच्छिन्नावच्छेदकताक प्रतिबध्यतानिरू)
(पित प्रतिबंधकताशालित्वं बाधनिर्णयत्वमिति तु निरूच्य तत्प्रतिबध्यतावच्छेदकत्वस्वीयविषयतायां निवेशनीयतया तद्दप्यव्यवहितपूर्वय)
(वितिमते पितादृशप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयतावच्छिन्न [redacted] त्वस्य प्रतिबध्यतायां निवेशो तत्तद्दोषवारणसंभवात्)
(अत्रोच्यते सारंभो व्यर्थ इत्यतस्तन्मते दुषणांतरमाह एतेनेति ॥२) (४॥ [illegible]

[illegible]

अवच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयसमुच्चयस्य पक्षतापत्तिः तस्यापि उक्तरूपाक्रान्तत्वात् न च विरोधावगाहि
त्वनिवेशान्न तद्वारणसंभवः क्वचित् किंचित्सत्तियौगिकविरोधमानस्य समुच्चये पक्षतत्वात् साध्यतदभावावगाहि विरोधावगा
हित्वस्य प्रत्येकं सकलसंशयसाधारण्यासंभवादिति चेत् संयोगादेरव्याप्यवृत्तित्वज्ञानदशायां तद्वत्त्वविषयीकृतधर्मि
णि तदभावादिग्रहस्य तद्वत्तावगाहस्य तदभावज्ञानप्रतिबंधकताया अव्याप्यवृत्तित्वज्ञा- स्योत्तेजकतामपेक्ष्य व्याप्यवृत्तित्वावगा
हित्वेनैव प्रतिबंधकतोपेयते व्याप्यवृत्तित्वं चानवच्छिन्नाधारताकत्वं सर्वत्र प्रतिबंधकत्वेन तादृशाधारतायाः अंततः संसर्गविधये
वभानमुपेयते एवं च समुच्चयनिष्ठकोटिद्वयविषयित्वान विपरीतधीप्रतिबंधकतावच्छेदकाव्याप्यवृत्तित्वविषयित्वानिरूपितत्वात्
अतस्तदुक्तसंशयत्वनिरुक्तौ रचपदेन समुच्चयोपादानासंभवेन तस्य पक्षतापत्तिविरहात् अथवा स्वघटितधर्मावच्छिन्न
प्रतिबंधकतानिरूपितप्रतिबंधकतावच्छेदकीभूतायाः स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयतानिरूपितप्रकारितां
सामानाधिकरण्यसंबंधेन तद्विशिष्टप्रकारितेव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये विरोधाभानेन कोटिद्वयविषयितयोर्वि

रोधविषयतानिरूपितत्वात् संशयेचांशतः कोट्योः संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः यद्वा
६ संशयत्वं तत्कोटि ... विरोधस्यैवोक्तरूपेणोपादानसंभवात् न वस्त्वंतरविरोधभानमादाय अतिप्रसंग इति केचित्तु सा
ध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकविशेष्यताशालित्वं समुदितार्थः २ शये धर्मिणि उभयप्रकारतानिरूपिते
काविलक्षणविषयितासमुच्चयवैलक्षण्यायोपग० तद्वति तादृशविषयतायाः विभिन्नरूपेणोभयनिश्चयप्रतिबध्यतावच्छेदक
तयानासंभव इत्याहुः॥ तच्चिंत्यं [illegible] कृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकज्ञानत्वादिकमुपेक्ष्य
निरुक्तरूपेणसंशयनिवेशनप्रयोजनं दर्शयति। तिनेति। नपक्षेति। न पक्षविशेष्यकस्य पक्षः साध्यवान्नवेत्याकारकस्य साध्य
विशेष्यकस्य साध्यं पक्षवृत्ति नवेत्याकारकस्य संशयस्याननुगमः तथासति फलस्याविलक्षणतया व्यभिचारेण [illegible]
ताभज्येतेतिभावः। इदमुपलक्षणं साध्यवद्भेदादिकोटिकसंशयाननुगमोपि बोध्यः विशिष्यसंबंधनिवेशप्रयोजनं दर्श
यति। नवेति। संबंधांतरेण। तत्संबंधातिरिक्तसंबंधेन। संदेहे। संदेहदशायां। निर्णीतसंबंधेन। पक्षांशे साध्यीयसंसर्गवि

धयातत्कालीननिर्णयविषयीभूततत्संबंधेन।एतदनंतरमनुमितावितिवारणायं।तत्संबंधेननिर्णीयासत्वेतत्संबंधेन
सिद्धिश्चान्यकालेइष्टापत्तिसंभवान्निर्णीतेत्युक्तं।संबंधमनिवेश्यसाध्यनिर्णयसामान्यनिवर्त्यत्वनिवेशेऽप्रसिद्धिप्रसंगः य
त्किंचिन्निर्णयनिवर्त्यत्वंयत्किंचित्संसर्गकनिर्णयसामान्यनिवर्त्यत्वंवायदिनिवेश्यतेतदायमतिप्रसंगोबोध्यः धर्मतांशपरि
त्यागप्रयोजनमाह नवातमःप्रभृतिष्विति।स्वधर्मत्वसंशयविषयसाध्यकत्वंपक्षत्वमित्युक्तौधर्मत्वनिवेशाप्य तिसाध्यक
घटादिपक्षकस्थलेनपक्षतावैकल्यंघटादिसमवेतत्वस्यप्रसिद्धत्वाद्गगनादौतत्संशयसंभवादितितमःप्रभृतिपर्यंतस्य
पक्षतात्वानुसरणंतथाचसाध्यसंबंधांतरेणपक्षवृत्तित्वसंदेहदशायांनिर्णीतसंबंधेनानुमितिवारणायप्रकृतसाध्यताव
च्छेदकसंबंधेनस्ववृत्तित्वसंशयस्यावश्यंनिवेशनीयतयातमःप्रभृतिसमवेतत्वस्याप्रसिध्यासाध्येपक्षवृत्तित्वसंशयमा
दायापिनतत्रपक्षतोपपत्तिरितिभावः रूपसंबंधेनतमोवृत्तित्वस्यप्रसिध्यातेनसंबंधेनानुमितौनानुपपत्तिरतःसम

शयेनेति पक्षे साध्यीयसाध्यतावच्छेदकसंबंधावच्छिन्नधर्मितासंशयस्य पक्षतात्वे तमः प्रभृतिषु वृत्तिमत्साध्यसाधनेनानुपपत्ति
८ रतः आकाशादीति। तद्वैकल्ये। पक्षतावैकल्यं। संदेहो अनुमितौ हेतुः विशेषणतया पक्षधर्मताज्ञाननिष्ठतज्जनकतायामवच्छेदको
वा। अथवा उपलक्षणतया तादृशजनकतायामवच्छेदकः तत्राद्यं पक्षद्वयं दूषयति। मूलसंदेह इति। विशेषणं। अपेक्षणीयानुमि
त्यव्यवहितप्राक्सत्ताकं। अनुमितिकारणे विशेषणविधया अनुमितिक...च्छेदके वेतियावत् परामर्शोपर्यन्तस्थसंशय
स्य नाशादित्यन्वयः यत्रादौ लिंगदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण लिंगदर्शनस्य। यत्र तयोर्विपरीतक्रमः तदभिप्रायेण
व्याप्तिस्मरणस्य नाशकत्वमभिहितं अत एकत्रोभयोर्नाशकत्वासंभवेपि न क्षतिः आदिपदेन यत्र संशयानंतरक्षणे व्याप्तिस्म
रणाद्यनुगुणज्ञानोत्पादः तत्र अनंतरमेव व्याप्तिस्मरणादिसत्वे तादृशज्ञानसं[redacted]ग्रहः द्वितीयं दूषयति नोपलक्षणमिति स्व
व्यावर्तकतापत्तेः। सिद्धि...अनुमिसवारकतापत्तेः। तत्कालीनपरामर्शस्यापि काल...संशयविषयधर्मिवृत्तित्वाव
गाहितया सामग्र्या अक्षतत्वादिति भावः अथवा साध्यसंदेहो अनुमितौ हेतुरेव लिंगदर्शनादेः इवीत्यन्तस्य संशयस्य तेन वि

नाशेपि तदनंतरपरामर्शाव्यवहितप्राक्क्षणे जातसंशयोत्तरादेवानुमितिरिति कल्प्यते न चानु[illegible]संशये यत्र स्वसामग्रीवशात् पराम
र्शोत्पत्तिस्तत्रानुमित्सनुदयप्रसंगः परामर्शकाले तदुत्तरं च विशेषदर्शनरूपप्रतिबंधकवशेन संशयोत्पादासंभवादिति वाच्यं फलानुरोधेन
सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात् यत्र संशयोत्पाद प्राक्क्षण एव परामर्शसामग्री प्रमाणसि
द्धा यत्र वा सामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र ॰ रामर्शानंतरं साध्यस्य पक्षे निश्चय एवोपगम्यते तत
एव प्रवृत्याद्युपपत्तेः तत्रानुमिनोमीत्यनुव्यवसायस्याप्यंगीकारात्प्रमते[illegible] अननुगतानां गतसिषाधयिषाभावकूटविशिष्टसिध्य
भावस्यानुमितिहेतुतापेक्षया संशयहेतुतायां लाघवात् संशयहेतुतोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितिवा ॰ णसंभवा
न्नानाविधबाधाभावस्यानुमितिहेतुत्वकल्पनेन अनुमितिसामग्रीप्रतिबंधकतायां तदनिवेशेन च लाघवाज्जनकज्ञानविरोधितयै
व बाधादीनां हेत्वाभासतोपपत्तेः संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्यं निवेश्यं विशिष्यतादृशसंशयत्वेनैव हेतुता वाच्या
अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततायाः उक्तयुक्त्या आवश्यकत्वात् प्रतिबध्यतादीनां स्वस्वावच्छेदकभेदेन ॰ नानामननुगमा

१ अशब्दानुगममात्रपर्यवसानेपि न क्षतिः संशयस्य बाधसाधारणतदभाववत्ताज्ञानत्वेन कारणत्वमिति तु न श्रेयः बाधनि
श्चये अप्रामाण्यग्रहसत्वे अनुमित्यापत्तेः अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात् साध्यसंदेहे अ
प्रामाण्यग्रहसत्वेप्यनुमि[illegible]पगमक्षतिविरहात् संशये अप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतया अप्रामाण्यशं
कास्कंदितबाधनिश्चयादनुमिते[illegible]वारणाच्चेति चेन्न विशिष्टपरामर्शवद्बाधित्वज्ञानपक्षधर्मताज्ञानयोरपि संशयं प्रति विशेषदर्शि
नविधया प्रतिबंधकत्वात् परामर्शाव्यवहितप्राक्क्षणेपि साध्यसंदेहासंभवात् [illegible]दिना निर्णीतस्यापि साध्यस्या
नुमित्सया अनुमितेरानुभाविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेः अनुभवापलापे विशेषदर्शनेन लक्प्रत्यक्षादेव सर्वत्र
वृत्या प्र[illegible]दिसंभवे अनु[illegible]माण्यस्यैव विलोपापत्तेः संशयानंतरजातसिध्यात्मकपरामर्शादनुमित्सापत्तेश्चेति संक्षेपः सं
शयनाशेपि यावन्न निर्णयः तावत्पर्यंतं संशययो[illegible]तायाः अनपायात् तस्या एव पक्षतात्वं संभवतीति तदनिराकरणे मूलस्यान्य

नतोऽतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे संशययोग्यतामिति साधकबाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतपर
त्वे सर्वदैवानुमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुभूत[illegible] चक्षुरादेः सिद्धिहेतुपरामर्शस्य [illegible] सत्वादतस्तत्पदं सिद्धिबाधपरं तया
व्याचष्टे साधकेति यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेपि न क्षतिः बाधसामग्र्यं तरक्षणे कदाचिदप्यनुमितेरनुत्पादात्तथापि
बाधजनकत्वमात्रेण तत्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुत्वापत्तेः तत्र चोक्तैवानुपपत्तिः बाधसामग्रीत्वेन तत्परत्वं च विनालक्षणां न निर्व
हतीति लक्षणायाः आवश्यकत्वे बाध एव लक्षणौचित्यमित्यभिप्रायेणेदं ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि साध्याभावाप्र
सिद्ध्या बाधाप्रसिद्धिरिति तदभावघटितपक्षतावैकल्यमत आह केवलान्वयिनि चेति पक्षनिष्ठेति साध्यद्रव्यादेः धीः निर्णयः सुलभो बा
ध इति तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः सुलभ इत्यनेन तत्राभावांशो साध्यां[illegible]बाधस्यापि कदाचि
त्कस्यचित्पुरुषस्य प्रसिद्ध्या तदभावघटितत्वमपि पक्षतायाः संभवतीति सूचितं व्याप्तिस्मरणादिना पूर्वानुमित्या [illegible]ऽनुमितिमुपपा
द्य सिसाधयिषाविरहेपीत्यादिमूलमवतारयति नन्विति तथापि परामर्शपूर्वमनुमित्या [illegible]ऽपि पुनरनुमित्या परामर्शानन्तरं अनु
मित्यन्तरं ननु परामर्शानन्तरं सन्देहाजनकत्वान्नेच्छाजननसमकालं परामर्शस्य नाशात्तादृ[illegible]ः कथमनुमितिरित्यत आह ततः परामर्शानन्तरमिति ॥

हेति।

१० विनश्यदवस्थानुमित्सया। अनुमितिमुपपाद्य। विनश्यदवस्थयाप्युपपादयति स्मरणेति चाक्षुषादिपरामर्शस्यानुमित्यंशेऽदृष्टसाधनताप्र
मुख्य कार० कसमूहालंबनत्वं नोपपद्यते तस्यायोग्ये विशेष्यज्ञानजननेनेंद्रियस्यासामर्थ्यात् अतस्तस्य तथात्वं [redacted] लकव्याप्यवत्पक्षगोच
रसंस्कारात्पूर्वानुमित्साजनकेष्टसाध० ताज्ञानाहितसंस्कारसहकृतानुभ [redacted] स्मरणात्मकपरामर्शान्तरस्यानुसरणं स्मरणेत्युपलक्षणं।
तथाविधमानसपरामर्शोऽपि बोध्यः ननु कल्पनाभावान्नेतादृशकल्पनासंभवेत्याशंकां परिहरति। फलबलादिति। सिषाधयिषारूपकारणं
विना अनुमित्यात्मककार्यानुत्पत्तिबलादित्यर्थः सिषाधयिषाविरहेऽपीति मूलस्यानुमातुरित्यादिः तेनेश्वरसिषाधयिषाया [redacted] व
पि न क्षतिः इच्छारूपपक्षतायाः आत्मनिष्ठप्रत्यासत्त्यैव हेतुतेत्यभिप्रायेणेदं न च तत्रापि पूर्ववत्फलबलादनुमित्सां कल्पयित्वा अनुमि
तिः शक्योपपत्तिका तत्र तदभावस्यानुमितिसिद्धतया कल्पनासंभवात् पूर्वं यस्य कदापि मेघानुमितिर्नासीत् तेन तत्रेष्टसाधनतायाः अ
स्य गृहीतत्वेन तद्गोचरस्मरणे तदनुमित्यनुभवमूलकस्य तदानीमभावेन तद्गोचरानुभवस्य [redacted] वन तदनुमित्ससामग्र्या एव
दुर्घटत्वाच्च विषयनिष्ठ [redacted] ानुमित्साया हेतुता वाच्येत्यभिप्रायेणोक्तस्थलेऽपि पक्षतोपपत्तिं दीधि [redacted] ति [redacted] कतान चानुमितीति।

इष्टैव। समानाधिकरण्यासमानाधिकरण्यासाधारण्येच्छामात्रमेवास्य निष्ठेव। अनुमात्समवेतेव। तस्याः। ईश्व[illegible]याः। पक्षता
प्रसंगात्। तथाच सिध्यनंतरमप्यनुमित्यापत्तिरित्यर्थः। तदानीं। सिद्धिदशायां। न तज्जनकत्वमिति। तथाचात्रानुमितिजनकत्ववि
शिष्टेच्छात्वेनैव हेतुताकारणतावच्छेदकविशिष्टस्य प्राक्सत्वनचफलोपधानेनेत्रमिति नातिप्रसंग इति भावः। अनुमितिजन
कत्वेन जनकत्वे आत्मा-क्षचत्वपरिस्फुटत्वात्तमुपेक्ष्य दूषणांतरमाह। तथीति। योग्यता। स्वरूपयोग्यता। अनपायादिति। कारण
तावच्छेदकधर्मरूपयोग्यतायाः सर्वदैवसत्वादित्यर्थः। तदुपधानं। तद्वैशिष्ट्यं। तदभावात्। अनुमितिवैशिष्ट्याभावात्। तथाचज
नुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्वेनानुमितेरेवानुपपत्तिः। इदमु[illegible]लक्षणं। अनुमित्यनंतरमप्यनु
मित्यापत्तिर्द्रष्टव्या। नन्वनुमितिजनकतावच्छेदकाया वेतो धर्माः प्रत्येकं तत्तद्वदि[illegible]विशि[illegible]व
धानमेव इच्छाविरो[illegible]पादयं तत्रकार्याव्यवहितप्राक्क्षणावच्छेदेनेति नातिप्रसंग इत्याशंकां परिहरति। न च तत्सामग्रीति। कार
णमात्रस्येति। तथाच परा-न्राधिसत्वदशायामीदृशपक्षताविरहादवा-मितिवारणसंभवात्। परामर्शादीनां हेतुताविलय

प्रसंगइतिभावः न - सामग्र्यासमवहिते [redacted] ।ऽनुमित्युत्पत्ते सामग्रीघटकहेतु [redacted] विशेष्याभावविनिगमना
११ विरहात्तेषां स्वतंत्रकारण [redacted] ऽ॥ [redacted] गस्यवारितत्वात् किंश्चीश्च रेछाभादायसिद्धि [redacted] दप्रवृत्तिनि
मित्तत्वमे [redacted] वतादूप्येणोपपद्यते अतोनायंदोषइत्यतो दूषणांतरमाह नेति अनुमितिसामग्र्या एव । क्षतात्वसंभवेनछारूप विशेष्य
भागा- [redacted] ः तत्रचपक्षापत्तेर्दू [redacted] तदानीमिति। [redacted] । समवहिते तरि छिद्दशायांअ
न्वयश्चास्य सामग्रीविरहेस नेन। वक्तव्यतापातात्। सामग्रीमध्यनिवेशापातात् तथाच तादृशाकारस्यारि [redacted] षाविरहविशिष्टसिध्यभाव
एव एवंचतस्यैवपक्षतात्वमस्तु अलंकारणांतरेण पक्षताकुक्षिनिवेशेनेतिसिद्धांतल [redacted] मितिभावः। सिद्धांतलक्षणेसिध्यु
त्तरक्षणे सिषा [redacted] धीनानु [redacted] नायम [redacted] तत्रतदेवोपपद्यते यदिसिद्धिः सिषाधयिषा। प [redacted] ज्ञानात्र
याणामनुमित्यव्यवहितपूर्वक्षणे अवस्थितिः संभवा । तन्नचैवं- पपद्यते आसमयोग्य [redacted] स्थायित्वयात्र
याणां [redacted] नचयत्रापक्षा - ध्यात्मक [redacted] साध्यनिश्चयस्यवाप्रथम - लादस्तत्रैवतृतीयक्षणेत्रयाणाम

वस्थानं [redacted]तीति वाच्यं अपेक्षाबुध्यादेः क्षणत्रयावस्थायित्वमंगीकुर्वाणैः तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादान
भ्युप[redacted] अन्यथास्वसमानाधिकरणस्वानंतरोत्पन्नविशेषगुणात्मकनाशकबलात्तस्यापि तृतीयक्षणे वि[...]रित्याशंकापरिजिही
र्षयासिध्यात्मकस[redacted] तादृश[redacted]ति। यत्रेत्यादिना। अनु- मितेः अव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्य
[redacted] त्रिकालज्ञाना[...]यां विशेषणज्ञानघट[redacted] इच्छापूर्वक्षणे तादृशसामग्र्यासमवधानदृच्छासाम[...] पक्षत्याप्र
य[...]सामग्र्याः प्रबल[...]तस्याजपिपूर्वोत्पादासंभवदृस्ततो विशिष्टस्मरणा- भावेन [...]तागमाय परामर्शापूर्वोत्पन्नेच्छायाः प्रयोजनमु
त्कालदनंतरो [...]च्छाक्षपूले तदृशयति। अनु- मितीति। यत्र स- षज्यते इच्छासामग्रीसंपत्तयेऽनुमितीष्टसाधनताविषयकेति तादृशस्मरणात्।
साध्यव्याप्यविशिष्टपक्षस्मरणात् पूर्वोक्त[...]स्याचा[...] परामर्शस्यानुमितीष्टसाधनताविषयकत्वासंभवात् य[...] परामर्शाव्यव
हितोत्तरक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षण एव फलस्यासंभवे- तस्याः [redacted] तिर[...] मयनाशात् कु[redacted] मितनायाजसंभवे
न इष्टसाधनताविषयकपरामर्शस्यावश्यकता [...]रणानुसरणे न्यूनतापरि[redacted]क्षपरामर्शस्य[...] प्रयोजनमाह अनुमित्याप

वैति। अत्रापि पत्रेसनुषज्यते प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्य [illegible] तज्ज [illegible] दिति तदुत्तरक्षणे विशिष्टप्रत्यक्षमेकमविषयतिन विछा
१२ विनश्यदवस्थासंनिकर्षा [illegible] शेषणप्रत्यक्षानुभावेनच प्रयासगौरवमतो विशेषणस्मरणपर्यंतानुधावने अनुमितत्वापूर्वकाले परामर्शजनकसंनि
कर्षादिसत्वे तस्याएवानुसन्तिरतो ऽनुमित्साकालोत्पन्नेंद्रियसंनिकर्षादिति। सत्कृतांतं। सत्कृतांतभागोपरस्थाप्य सिषाधयिषाविरहवैशिष्ट्यं। त
स्याभावे [illegible] प्येवादशायां तदभावविशिष्टस्य सिध्य [illegible] ऽसंभवात् सिध्यौत्सर्यांजसत्वाचानुमित्यनुपपत्तिरतः साधकमानविशे
षणमिति। सिषाधयिषापदस्य [illegible] सामान्यपरत्वे [illegible] प्रत्यक्षादि [illegible] बला [illegible] सिद्धिदशायां जनमित्यापत्तिः
अनुमितिगोचरत्वापरत्वेपिय किंचिद्गोचरज्ञानं जायतामितीच्छा [illegible] [illegible] सिद्धिकालेऽनुमित्यापत्तिः नचानुमि [illegible] सत्यापि [illegible] सिद्धेस्त
त्रानुमितिरिष्टैवेति वाच्यं प्रकृतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्ता [illegible] द्धिकाले [illegible] विकत्वात् उक्तेच्छायाश्चो
त्ततः उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिद्धावकिंचित्करत्वादियतः [illegible] व्याचष्टे। सिषाधयिषा [illegible] ति। पर्वतविशि
ष्टपर्वतविषयका [illegible] मितिर्जायतामित्येतादृश [illegible] सिद्धिसत्वेवन्ह्यनुमित्यनुत्पादात्तत्साध्यविशेषेति तत्संबंधेनतत्साध्यता [illegible] वच्छिन्नेत्य विशिष्ट
र्थः तेनकालिकसंबंधेनवन्हिविशि [illegible] विषयकानुमितिर्जायतां [illegible] विशिष्टपर्वतादिविषयकानुमितिर्जायतामित्येता [illegible] जेव

पिनसिद्धिकालेसंयोगादिनावा [redacted] च्छिन्नस्यानुमितिः वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमि
तिर्जायतामितीच्छा [redacted] वह्निमानित्या [redacted] पादानु तत्पक्षकेतितत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः नचयकिंचिदनुमानंजायतामितीच्छाबलादि
वालोकवान्पर्वतइत्याद्यनुमितिसामग्रीदशायांवह्निमत्पर्वतविषयकानुमितिर्जायतामितीच्छाबलादपिसिद्धिसत्त्वेवह्न्यनुमितिर्नजाय
ततकालीनसिध्यप्रतिबंधालोकानुमि[illegible]पत्त्यैवतादृश[illegible]विषयवारत्वव[illegible]ह्निमत्पर्वतविषयकानुमितीच्छाविषयसिद्धेरित्युक्तरूपेणा
[redacted] तीतिवाच्यंसाध्यविशिष्ट[illegible]निरूपितविलक्षणविषयिताप्रकारकत्वेनवच्छ[illegible]याजनकत्वापगमात् आलोकवान्पर्व
तइत्याद्यनुमितेर्वह्निविशिष्टनिरूपितविलक्षणविषयिताशून्यत्वेनतद्रूपत्यातादृशविषयता [redacted] विषयसिध्यसंभवात् साध्यविशि
ष्टपक्षेनिरूपितत्वंचसाध्याव[illegible]पक्षनिष्ठनिरूपकताकत्वमतोह्रदोवह्निमानित्यादौसाध्यविशिष्टपक्षाप्रसिध्यावपिनतादृशविष
यितायास्तत्प्रकारकेच्छायाश्चाप्रसिद्धिः ह्रदादिनिष्ठतादृश[illegible]नवृत्तिविषयितानिरूपकत्वस्यापिह्रदाद्यंशेप्रकारीभूतवह्न्याद्यवच्छिन्न
ते तातुवस्तुतस्तुतत्साध्यविशिष्टतत्[illegible]विषयकत्वेनतत्साध्यतावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविषयतानिरूपिततत्पक्षतावच्छेदका

वच्छिन्नोद्देश्यता[redacted]कत्वपर्य्यन्तं विवक्षितं अतो वह्निमान्पर्वतो घटवानिसाध्यनुमितिसामग्रीदशायां पर्वतोक्तयुक्त्या वह्निविशिष्टपर्वत
१३ विषयकानुमितिर्जायतामितीच्छाबलात्पर्वतादिपक्षकवह्न्यादिविधेयकानुमित्यनुत्पादेऽपि न क्षतिः तादृशोद्देश्यतात्वेन न च
तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वावच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताप्रकारकानुमित्सादशायां पर्वतेऽ
न्यानुमितिसामग्रीसत्त्वे वह्नेः सिद्धिसत्त्वेन वह्न्यनुमित्यापत्तिः (एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं
अन्यथा जातिमान् वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनवच्छिन्नत्वानवगाहीच्छाकाले पर्वतो वह्नि
मानिस्यनुमित्यापत्तेः पर्वतो वह्निव्याप्यवानिति परामर्शकालीन जातिमान् वह्निव्याप्यवानिति परामर्शकालीनानवच्छिन्नत्वानव
गाहीच्छानां च तत्तदिच्छात्वेनोत्तेजकत्वमिति बोध्यं) साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनप्रयोजनं दर्शयति। यत्किंचिदि
ति। किंचिद्विषयकत्वप्रकारकत्वनिवेशेऽपि यत्किंचित्ज्ञानं जायतामित्यादीच्छावारणं संभवतीति यत्किंचिद्गोचरत्वप्रकारके
च्छानुधावनं न चेच्छापूर्वं यत्किंचिद्गोचरज्ञानस्यावश्यं सिद्धतात्तादृशेच्छैव न संभवति ज्ञानगोचरेच्छायां स्वरूपसत्त्वस्वविषयसिद्धे

रेव विरोधित्वात्तदुक्तं न हि ज्ञाने जाते ज्ञानेच्छा भवतीति वाच्यं एतदुत्तरवर्तियत्किंचिद्गोचरं ज्ञानं जायतामित्याद्याकारकेच्छाया विवक्षि
तत्वात् नन्वनुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छावारणसंभवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशेनेत्यत आ
त्वअनुमि-तित्वाप्रकारिकायामपीति। प्रत्यक्षात्मकसिद्धिदशायां पर्वते वह्निज्ञानं जायतामित्याकारकेच्छा न संभवति तद्विषयीभूतप्र
क्षादिरूपसिद्धेरेवासिद्धत्वात् अतः प्रत्यक्षाद्यतिरिक्तमितिशब्दरूपसिद्धौ प्रत्यक्षा[redacted]द्यतिरिक्तज्ञानं जायतामित्यादीच्छाया उत्पादासं
भवात् प्रत्यक्षाद्यनंतरमिति प्रत्यक्षादिरूपसिद्ध्यनंतरमित्यर्थः अनुमित्सुसादाश्चेति तथाचानुमितित्वप्रकारकत्वं निवेशयितुम
शक्यमेव तादृशेच्छाया असंग्रहादिति भावः। इदमुपलक्षणं। अनुमितित्वप्रकारकत्वनिवेशेपि घटानुमितिर्जायतामितीच्छाकालसिध्य
वह्न्याद्यनुमितिवारणाय पक्षतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकं न च प॰ तसाध्यादिविषयिणी यानुमितिस्तद्वि
षयकत्वनिवेशनेनापि दर्शितेच्छावारणसंभव इति वाच्यं दर्शितेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालंबनानुमिति
विषयकत्वात् न चानुमितित्वप्रकारकत्वानिवेशे अनुमितेरेव यत्र प्रत्यक्षत्वादिनेच्छाविषयत्वं तत्रानुमित्यापत्तिः इष्टत्वात् अनुमितोप्र

श्नत्वानुमितदशायामेवतादृशेच्छायाउत्पादात् तस्यानुमितित्वप्रकारकेच्छासमकालीनत्वात् नचानुमितित्वप्रकारकत्वस्यानिवेशेपर्वतेवह्नेःप्र
१४ त्यक्षतःसिद्धौतादृशसामग्र्यांसत्यांप्रत्यक्षभिन्नंज्ञानंजायतामितीच्छासत्वेअनुमित्यापत्तिरितिवाच्यंतत्रपक्षतासत्वेप्यनुमितित्वप्रकारके
च्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याःप्रतिबंधकत्वादेवानुमितिवारणसंभवात् अथसिद्धिदशायांपर्वतेवह्नेरन्यज्ज्ञानंजा
यतामितीच्छासत्वेऽनुमित्यापत्तिःतस्याअपिअनुमितिविषयकत्वात् नचेष्टापत्तिःतदुत्तरपर्वतोवह्निमानित्यादिमानसाधुसत्त्वा
वपिविषयसिद्धेस्तादृशेच्छायायत्किंचिद्गोचरंज्ञानंजायतामित्येतादृशेच्छातुल्यत्वात् नचप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबं
धकसत्वान्नानुमित्यापत्तिरितिवाच्यंप्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टायाएवमानसादिसामग्र्याअनुमितिप्रतिबंधकत्वात् अन्यथासि
द्धिरन्यकालेपितादृशेच्छासत्वेऽनुमित्यनुत्पादप्रसंगात् नचोक्तयुक्त्यावह्निविधेयकत्वावगाहित्वनिवेशनस्यावश्यकत्वाद्वह्निप्र
कारकत्वावगाहिदर्शितेच्छाबलान्नानुमितिप्रसंगःअनुमितिनिष्ठतद्विधेयक[illegible]दीच्छायांचजायतएवानुमितिःविधेयतायां[illegible]
प्रत्यक्षेअप्रामाणिकतयातत्प्रकारकेच्छायाःअनुमित्युत्पत्त्यैवविषयसिद्धेरितिवाच्यंविधेयतायाःप्रत्यक्षत्वा[illegible]तत्प्रकारका[illegible]ःप्रत्य

क्षान्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले संभवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्यन्तानुधावनस्य दीधितिकृतो निर्बी
पाता जत्वात् नच विधेयताप्रत्यक्षव्यावृत्तैव तदवगाहित्वसूचनायैव दर्शितेच्छान्त्रे[illegible]प्रत्यक्षान्यत्वोल्लेख इति वाच्यं एकमपि वक्ष्यमाण
स्य शाब्दसिद्धिकाले शाब्दज्ञानं जायतामितीच्छाबलेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाल इत्यस्य संगमयितुमश
क्यत्वात् तादृशेच्छायाः प्रत्यक्षव्यावृत्तविधेयतावगाहित्वे प्रत्यक्षसामग्रीकालेपि तद्बलादनुमित्योचित्या[illegible]नवगाहित्वे सि
द्धावप्यनुत्तेजकत्वात् अ[illegible]ते अनुमितित्वप्रत्यक्षान्यज्ञानत्वादि[illegible]मनुमितिविषयकेच्छात्वेनैवानुगमः पर्व
ते तेवन्हेरन्यज्ञानं जायतामिति साध्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्यां च अनुमिते[illegible] तथावि
धेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबंधकताकल्पनेति न दोषः नच तासां तत्तद्व्यक्तित्वेनानंतप्रतिबंधकताकल्पनम
पेक्ष्य अनुमितित्वादिरूपप्रकारविशेषमं[illegible]तर्भाव्यैवानुमितीनामुत्तेजकत्वं उचितमिति वाच्यं तथा सति पर्वते वन्हित्वा

नं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटानुमितीच्छाविशिष्टतत्सामग्रीसत्वे सिद्धौसत्यामप्यनुमित्युपपत्त
१५ ये तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धौ उत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेषणविशेष्यभावे विनिगमनाविर
हेण सिद्धिप्रतिबंधकतानंत्यप्रसंगात् ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छायाः [illegible] पक्षोद्देश्यकत्वा
वच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छायाः असंग्रहः एवं विषयानुपरक्तानुमितिविषयिण्या अनुमितिर्जायतामितीच्छाया अ
पि निरुक्तरूपे [illegible] न चासंग्राह्यैवैषा । असिद्धसाध्यान्तरानुमितिसामग्र्यामसत्यां तद्दलादपि सिद्धप्रकृतसाध्यानुमि
तेस्तदिच्छाविषयसिध्यनुरोधेनावश्यकत्वादित्यत आह [illegible] असत्त्वां सिद्धौ यत्किंचिद्गोचरं तज्ज्ञानं [illegible] जायतामि
त्यादीच्छासत्वेऽनुमित्युत्पादात्तासां चानुत्तेजकत्वात् सिद्धौसत्यामिति [illegible] भावसमुदायस्येति । साध्यविशेषविशिष्टप
क्षविशेषाद्यवगाहित्वप्रकारकेच्छानां तदवगाहि[illegible]त्वप्रकारकानुमितिगोचरेच्छात्वे [illegible] नञनुगमय्य एकैकत्वावान्निवेशयंत्त

अतथाविधानामनुमितिर्जायतां प्रत्यक्षान्यज्ञानं जायतामित्याद्याकारकेच्छानां तु यद्व्यक्तिसत्वे सिद्धिदशायामनुमितिस्तद्व्यक्ति
त्वावच्छिन्नाभावा [illegible] एव निवेशनीयाः अन्यथातिप्रसंगात् तत्कालीनसिद्धिभेदा एव वा यत्तेन तत्कालीनसंयोगविभागादिव्य
क्तिविशेषाभावनिवेशमादायविनिगमनाविरहो निरस्तः सामानाधिकरण्यसंबंधेन तदवच्छिन्नाभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सि
द्धिभेदानां विशेषणता विशेषसंबंधेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसंबंधानिवेशे लाघवात् सिद्ध्युत्तरं तथाविधेच्छासत्त्वे काले च
अनुमित्सापनीसुरेच्छासामग्र्या अनुमितिविरोधित्वा[illegible]देवनसंभवतीति [illegible] यं इदंत्वव[illegible] तादृशेच्छाभावसमुदायस्य न तत्समुदा
यत्वेन निवेशः तावन्मात्रविषयकधीविषयत्वरूपस्य तावत्समुदायत्वस्य तद्रूपेण निवेशे महागौरवात् तादृशायाः किंचिद्रूपेण तद्व्यक्तित्वेन
निवेशे तथाविधधीसहस्रस्य वि[illegible]निगमनाविरहेण निवेशाप्रसंगात् किंतु तत्तदभाववैशिष्ट्यत्वेन सिद्धेरेव निवेशयितुमुचितत्वात् [illegible]
तत्तदभावानां मिथो विशेष्यविशेषणभावापन्नानां निवेशस्य प्रसक्तमतिप्रसक्ततया अवच्छेदकत्वायोगेनासंभवरूपि [illegible]
वा विशिष्टअपराभावत्वेनैवाभावानां निवेशनीयत्वात् तत्र च विशेषणविशेष्यभावे विनिगमनाविरहेऽपि न क्षतिः गसंत्तराभावात् तावद

भाव मात्र विषयक धी विषयत्वेन निवेशोपि तन्नेन तदभाव विषयिता नामक विशिष्टापरत्वेनैव निवेशनीयतया विशेष्य विशेषणभावे विनिग
मनाविरहस्या वश्यकत्वादिति इच्छाया अनुमानापि एकरूपेण सर्वासां मिच्छानां उपादानासंभवेपि न क्षतिः नासिषा धयिषा विरह विशिष्ट सि
१६ द्ध्यभावस्यानुमितिहेतुत्वानुपपत्तिस्तावदभाव विशिष्ट सिध्यभावस्याननुगतत्वादिति भावः इत्थं च वह्नि विशिष्ट पर्वत महानसोभयानु
मितिर्जायतामित्याकारकेच्छायामपि तत्साध्य विशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्वते वह्नेः सिद्धिकाले महानसपक्षकानुमिति सामग्र्या
मसत्यां तादृशेच्छाबलात्पर्वते वह्न्यनुमित्यापत्तिः अनुमित्यंशे तत्साध्य विशिष्टतत्पक्षविषयकत्वान्यये किंचिद्विषयकत्वाप्रकारकत्व विशेषणा
स्येच्छायां निवेशे वह्नि विशिष्टं पर्वतं महानसं चानुमिनुयामित्यादि समूहालंबनेच्छायामसंग्रहप्रसंगः वह्नि विशिष्ट पर्वत विषयिणी महान
स विषयकानुमिति भिन्नानुमितिर्जायतामित्याकारकेच्छाबलादुपदर्शितस्थलेऽतिप्रसंगस्याशक्यवारणत्वाच्चेति इच्छाविषयतावच्छेदकता
या पर्याप्तिनिवेशनमावश्यकं तथा च वह्नि विशिष्ट पर्वतानुमितिर्भवतु इतीच्छायास्तत्साध्य विशिष्टतत्पक्षविषयकानुमितित्वपर्याप्त वि
षयतावच्छेदकताकेच्छात्वेनोत्तेजकत्वं पर्यवसितं अनुमितित्वानंतर्भावेन तादृशेच्छायास्तत्साध्य विशिष्टतत्पक्षा...रिसमासे वि
षयतावच्छेदकताकत्वाभावेन ...त् एवं चानुमितित्व प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण संग्रहा

भिधानमसंगतं नच्च तक ल्लं परित्यज्यैव यादृशाया दृशं त्वभिधाने इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक्पृथगभावनिवेश
नमभिप्रेतमिति मच्चं पत्[illegible] सूचक वाकाराभावात् अथानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकेच्छानां मनुग[illegible] भवतीत्तथाहि तत्साध्य
विशिष्टतत्पक्षकानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्माघटकपरिसमाप्तावच्छेदकताकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकत्वा॰
मितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकविषयताकत्वमेवपर्यवसितं एवं च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रत्यक्षान्यज्ञानत्वादि
निष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक्पृथगुत्तेजकतापेक्षया निरुक्त
धर्माघटकानुमि॰ तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमुचितं लाघवात् अथ
तादृशरूपेणैव प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामपि संग्रहः संभवति मच्च वह्निविशिष्टपर्वतविषयकं जायतामितीतादृशेच्छायाः सिध्युत्त
रसंस्कारमात्रेण निवर्त्याया वारणाय विषयितायामनुमितित्वावच्छिन्नत्वविशे॰[illegible]कतया न तत्संग्रह इति माच्च समवायेन किंचिदव
च्छिन्नत्वं निवेश्यैव तादृशेच्छावारणसंभवादिति चेन्न एवं सति पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूपसमशील रूपान्तरे
णोत्तेज[illegible]पेक्षया तादृशावच्छेदकतायामेव पक्षांशे तादृशसाध्यावगाहितीयावच्छेदकताभिन्नत्वं निवेश्यतां तावतैव तत्संग्रहस्यापि संभवा
त् इच्छायाश्चेननुगमाभिधानासं॰ तेः मच्च विषयितायां साध्यविशिष्टपक्षावगाहिताच्छिन्नत्वनिवेशनमावश्यकं अन्यथाऽन्यानुमिति

१६

संयोगनिवेशे चनोपपत्तिः इच्छायां तद्देशस्य अव्यावर्तकत्वात् तत्संयोगाभावानां वैशिष्ट्यस्य निवेशे तादृशवैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्संबंधेन इच्छाभेदनिवेशे
तादृशेच्छानां तत्तद्व्यक्तित्वेन वोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानाम् अननुगमाभिधानसंगतिरिति वाच्यं तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतयैवातिप्रसंग
सामग्रीसमवहितानाम् अनुमितिजनकीयतामिर्याकारकविषयविशेषानुपरक्तेच्छानां वारणासंभवादिति अन्यानुमितिसामग्रीसमवहितत्वे तथावि
धेच्छानां तत्तद्व्यक्तित्वेनोत्तेजकताकल्पने गौरवप्रसंगात् [illegible] उक्तसकलेच्छानां निरुक्तरूपेणाननुगमेऽपि एतत्क्षणानन्तरक्षणेऽनुमिति
र्भवत्वित्याकारकेच्छानामेव निरुक्तेन रूपेणासंग्रहात् तत्तद्व्यक्तित्वेन पृथगभावा निवेशनीयाः तादृश[illegible]वृत्तिताधवच्छेदकताभेदमूलावच्छे
दकतायां निवेशस्य तत्संग्रहे कालांतरे पितथाविधेच्छाबलादनुमित्युपत्तेः कालांतरे अनुमित्सुसत्त्वाच्च तादृशानुमित्साया विषयासिद्धेरिष्टा
पत्त्ययोगादित्यननुगमाभिधानसंगतिः नचैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वविशेषणाभिधानस्यासंगति
र्दुर्वारैवेति वाच्यं अनुमितिनिष्ठविषयितायां साध्यविशिष्टपक्षविषयिताधन्यप्रकारकतानवच्छिन्नत्वनिवेश एव तात्पर्यात् [illegible] साध्यवि
शिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकं अन्यथा यत्किंचिद्ज्ञानं जायताम् यत्किंचिद्ज्ञानं जायताम् इतीच्छावारणासंभवा
त् तत्संग्रहे तादृश[illegible]सर्वासामिच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् अनुमितिजनकीयतामित्यादीच्छानां च पृथगनुमितित्वादिपर्या
प्तविषयतावच्छेदकताकेच्छात्वेनोत्तेजकता अन्यानुमितिसामग्रीसमवहिततादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वमेवेति सर्वसा
मंजस्यं [illegible] धूमेन वह्निमनुमि[illegible]रकेच्छाबलाद्धूमलिंगकानुमित्युत्पत्तेः साधारणरूपेण सिषाधयिषाया सिषाधयिषा

प्रतिबंधकत्वे तत्कालीनतत्तदात्ममनःसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबंधकताप्रसंगवत् तादृशसामग्र्यभावकालीनतथाविधेच्छानां तत्तद्व्यक्ति
त्वेनोत्तेजकतामतेऽपि विनिगमनाविरहेण तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकताप्रसंगस्य दुर्वारत्वात् अथ [illegible]रूपेणोत्तेजकीभूतावांछायामनुमितिजनयता

जकतायाआवश्यकत्वात्तत्सत्वे सिध्धिकाले असत्यपि धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षतायाअक्षतत्वादित्यतआ
हधूमेनेतिभिन्नलिंगकधार त्वे सिध्धिदशामात्रएवयदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबंधकत्वं नलंघनीयतोअ[illegible]पिसि
ध्याविति तत्रानुमितेः संदिग्धत्वायायदीति तदेति तल्लिंगकानुमितावितिशेषः अन्यमात्रेपि तदन्यमात्रेलिंगकत्वप्रकारक[illegible]सर्थः
धूमलिंगकानुमितिरालोकलिंगकानुमितिश्चजायतामित्याकारकसमूहालंबनेच्छाकाले आलोकादिपरामर्शादनुमित्युपपत्त
ये मात्रेति तदन्यमात्रलिंगकत्वप्रकारकत्वंच नल्लिंगकत्वाप्रकारकत्वसति किंचिल्लिंगकत्वप्रकारकत्वमतः [illegible]न्यलिं[illegible]कस्थ
ले तदन्याप्रसिध्धावपि नदोषः तल्लिंगकत्वाप्रकारकत्वंच तल्लिंगकत्व[illegible]निरूपितत्वे साध्यविशिष्टत्वपक्षविषयक[illegible]वच्छिन्ना
नुमितिनिष्ठविशेष्यताकान्यत्वमत आलोकेनेंधनेंधूमेनतुव[illegible]नुमित्यादीच्छादशायामालोकादिलिंगकत्वेप्याध्यनुमि[illegible]नापत्तिः
आलोकलिंगकत्वप्रका[illegible]ताशरीरेचवास्तवालोकादि[illegible]कारता[illegible] ननिवेशनीया किंत्वालोकत्वाद्यवच्छिं[illegible]प्रकारतत्वअन्यथाआलो
कत्वादिनाधूमत्वादिनाच धूमालोकमवगाहमानयोरिच्छयोरालोकलिंगका[illegible]मितिप्रतिप्रतिबंधकत्वतदभावयोरापत्तेः द्रव्येणा

नुमि ३

१८ नुमिनुयामित्यादौ छायाः आलोकादिलिंगकानुमित्यविरोधित्वोपपत्तये आलोकत्वावच्छिन्नत्वस्थले आलोकाप्रवृत्तित्वेन ज्ञायमानधर्मा
वच्छिन्नत्वमेव निवेश्यं द्रव्यत्वादेरालोकत्वादिविरुद्धत्वाग्रहदशायां तादृशछायाविरोधित्वोपपादनायालोकत्वादेरालोकादिवृत्तित्वज्ञानशू
न्या[illegible] कालीनाया आलोके नानुमिनुयामित्यादौ छायाः अविरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्य चोपेक्ष
[illegible] त्वादेरालोकाप्रवृत्तित्वाग्रहदशायां धूमेनानुमिनुयामितीछाया आलोकादिलिंगकानुमित्यविरोधित्व[illegible]मिष्टमेव विरोधित्वं च तादृशो
छायाधूमत्वादावालोकत्वादिविरुद्धत्वाग्रहदशायामेव [illegible] द्रव्यं न आलोक इत्यादिज्ञानशून्यकालीनानां आलोको द्रव्यमित्यादिज्ञा
नकालीनानां चेच्छानां तत्तद्व्यक्तित्वेन भेदकूटस्य वा स्वातंत्र्येण [illegible] ते बंधकतावच्छेदके अनुप्रवेशनीयः तेनोक्तकल्पकालांतराणां रूपांत
रीणां ज्ञानवारणाय स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोर्ज्ञानविशेषणता ध्रौव्ययदायस्य कचिदपि धर्मेनालोकाप्रवृत्तत्वज्ञा
नं तदा स्वसमानाधिकरणस्वसमानकालीनतादृशज्ञानाप्रसिध्या तद्घटितप्रतिबंधकतावच्छेदकाप्रसिध्यावपि न क्षतिः आलो
को द्रव्यमित्यादिज्ञानविशिष्टत्वेनालोको द्रव्यमित्यादिज्ञानविरहविशिष्टत्वेनैव वा द्रव्यत्वादिलिंगकत्वप्रकारकेच्छा अनुगमय्य तद्व

(आलोकोद्रव्यमितिव)

दास्ताद्दशप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः। भेदस्य कालिकाव्याप्यवृत्तित्वोपगमात् नाद्दशज्ञानजन्यकालीनानां द्रव्येणानुमिनुयाम्
इत्यादीच्छानां विशिष्टभिन्नतया प्रतिबंधकत्वोपपत्तिः सामानाधिकरण्यसंबंधेन वैशिष्ट्यनिवेशात् न [illegible] ज्ञानमादाय दोषः द्रव्य
त्वावच्छिन्नेनानुमिनुयाम् इत्याद्याकारिकानां द्रव्यत्वांशे लिंगतावच्छेदकत्वावगाहीच्छानां तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वा
दिमल्लिंगकत्वप्रकारत्वं विषयतायां वतत्र द्रव्यत्वाद्यवच्छिन्नत्वभानात् लिंगांशे द्रव्यत्वानवगाहनात् अतस्तथाविधेच्छानामालोकत्वाद्य
वच्छिन्नलिंगकानुमितिविरोधित्वमक्षतमेव आलोकत्वाद्यवच्छिन्नेनानुमिनुयाम् इत्यादीच्छानां तादृशानुमितिविरोधित्वोपपत्तये चालोकलिं
गकत्वाद्यप्रकारकत्वं वदा... [illegible] धवच्छिन्नलिंगकत्वाद्यप्रकारकत्वं पि आलोकत्वाद्यवच्छिन्नलिंगकानुमितिप्रतिबंधकतायां निवेशनी
यं एवं वह्निमनुमिनुयाम् इत्याद्याकारकलिंगविशेषजन्यत्वानवगाहीच्छानाम् अविरोधित्वोपपत्तये किंचिल्लिंगक [illegible] प्रकारकत्वं निवे
शनीयं तदर्थश्च किंचिल्लिंगकत्वप्रकारतानिरूपितत्वसाध्यविशिष्टत्वप्रकारविषयक [illegible] तावच्छिन्नविशेष्यताकत्वं अतो धूमेनेंधनम
नुमिनुयाम् इत्याद्याकारकेच्छानाम् आलोकादिलिंगकत्वेनाप्यनुमितिविरोधित्वं [illegible]। आलोकलिंगकधूमलिंगका [illegible] मि

तिर्जायतामित्याकारकेच्छाकाले केवलालोकलिंगकपरामर्शादनुमितिर्नो जायते तथाविधानुमितेस्तादृशेच्छाअविषयत्वानुक्त
१९ यलिंगकानुमितेरेव तद्विषयत्वात् एवं धूमलिंगकवह्न्यनुमितिरालोकलिंगकवह्निघटोभयानुमितिश्च जायतामितीच्छाकाले घटा-
नुमितिस्तादृशेच्छाभावसत्त्वादालोकपरामर्शाद्वह्न्यनुमितिर्न जायते घटांशविषयकानुमित्युत्पत्तौ तादृशेच्छाविषयाभिधेरतस्तथाविधेच्छा
नां तत्र तत्र प्रतिबंधकतानिर्वाहाय तल्लिंगकत्वे तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्न [illegible] निरूपि
तविशेष्यताशून्यत्वमेव तल्लिंगकत्वाप्रकारके सत्त्वेन विवक्षणीयं उक्तस्थले चालोकलिंगकवह्न्यनुमितित्वादिप्रकारतानिरूपि
तविशेष्यतायास्तादृशप्रकारतातिरिक्तधूमलिंगकत्वादिप्रकारतानिरूपितेव समूहालंबन एव प्रकारताभेदेन विशेष्यताभेदोऽ
न्यथा समूहालंबने तस्यादृशेच्छाया वैलक्षण्यानुपपत्तिः तथान्य तादृशेच्छानां तथाविधप्रकारतानिरूपितविशेष्यताशून्य
त्वेन प्रतिबंधकत्वनिर्वाहः आलोकेनानुमितिर्जायतां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छानां ता
तादृशविशेष्यताशून्यत्वविरहेऽपि आलोकलिंगकान्यानुमितिसामग्रीकालीनतथाविधेच्छानां तत्तद्व्यक्तित्वेन पृथक्प्रति

वह्न्याद्य

बंधकतोपगमात्तादृशानुमितिसामग्रीदशायां तादृशेच्छाबलादालोकलिं[illegible]गकानुमित्यापत्तिः पर्वते वह्निमनुमिनुयां धूमेन च प
र्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनुमितिर्भवत्येव [illegible]लिंगविशेष जन्य
त्वानवगाहीच्छानां विशेषदले नैव वारणं धूमेन घटमनुमिनुयामित्यादीच्छावारणमेव विशेषदलप्रयोजनं तदर्थं च नाकिंचि
ल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं तथा सति धूमेनानुमिनुयामित्याद्या
कारकविषयविशेषानुपरक्तानुमितीच्छानामसंग्रहापत्तेः किं तु किंचिल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयक ।अनु
मितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकत्वं न धूमेन घटमनुमिनुयामितीच्छावधूमेन वह्निः स्यात्
यमनुमिनुयामित्यादीच्छाया अपि आलोकादिलिंगकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव सिद्धौ तादृशेच्छाया अनु
त्तेजकतया सिषाधयिषाकाले तादृशेच्छाबलादालोकलिंगकानुमितीच्छायां न तादृशानुमितिरिति [illegible] एकलिंगकेच्छाकालीनो

१स स्यामा

१ यल्लिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणप्रकारश्च पुनरग्रे प्रदर्शयिष्यते ननु स्वविषयसजातीयज्ञाने इच्छाया
२० विरोधित्वमदृष्टचरमित्यत आह कामिनीजिज्ञासादिवदिति यथा कामिनीप्रत्यक्षादिगोचरेच्छा घटादिविषयकप्रत्य
क्षादिप्रतिबंधिका तथेत्यर्थः प्रतिबंधकेति पक्षतासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः तथा चो
क्तस्थले पक्षतासत्त्वेपि सति विरहादिकमेवेति भावः ननु कामिनीजिज्ञासादशायां कामिनीभिन्नघटादिविषयकज्ञाना
नुत्पादस्य सर्वानुभवसिद्धतया तस्यास्तत्प्रतिबंधकत्वमस्तु सिध्येत् रसनत्वे धूमादिलिंगकानुमित्यनुत्पाददशायां आ
लोकादिलिंगकवह्न्यनुमित्यनुत्पादस्तु नानुभाविकः तथा सति तुल्ययुक्त्या घटाद्यनुमितेः प्रत्यक्षादिगोचरेच्छाद
शायामपि तदनुत्पादस्य तथात्वप्रसक्तेः न त्वेतत्कमपि विरोधमीक्षामहे इत्यभिसंधायोक्तापत्तिवारणाय कल्पांतरमनु
सरति यद्वेति तथाच [illegible] जन्यलिंगकानुमितीच्छायां प्रतिबंधकत्वमसंभावितमेवेति भावः तत्रेति जन्यलिंग

कानुमितीच्छासत्त्व इत्यर्थः तल्लिंगकानुमितीच्छा तल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाव
च्छिन्नविशेष्यताकेच्छा वाच्या॥ सिषाधयिषापदेन विवक्षणीयस्य [illegible]न्वयः नन्वेवं लिंगविशेषानुपरक्तानामनुमितीच्छाका
ले सिद्धौ सत्यामनुमित्यनुपपत्तिरित्यत आह तदन्यमात्रेति धूमेनालोकेन च वन्हिमनुमिनुयामित्यादिसमूहालंबने
च्छाकाले आलोकादिलिंगकानुमित्युपपत्तये मात्रेति तथा च तल्लिंगत्व[illegible]साध्यविशिष्टतत्पक्षविषयकानुमितित्वप्र
कारिकासतीया तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादि[illegible]कारकेच्छा तदन्यत[illegible]साध्यविशिष्टत
त्पक्षविषयकानुमितित्वा[illegible]रिकेत्यर्थः लिंगविशेषापरक्तानुमितीच्छासंग्रहाय सत्यंतं आलोकेनेंधनमनुमि
नुयां धूमेन च वन्हिमनुमिनुयामित्याद्याकारकेच्छाबलादालोकलिंगकवह्न्यनुमित्यापत्तिवारणाय तत्रसाध्यादि
निवेशः लिंगविशेषानुपरक्तानुमितीच्छाकाले पर्वते वन्हिमनुमिनुयां धूमेनेंधनमनुमिनुयां इत्याद्याकारकसमूहा
लंबनेच्छाकाले आलोकादिलिंगकानुमित्युपपत्तये तद्विशेष्यदलं यत्किंचिज्ज्ञानं जायतामितीच्छावारणाय

 ग्र० प० २८ (॥आलोकलिंगकत्वप्रकारकं स्वशरीरे वास्तवालोकत्वादिप्रकारत्वानिवेश्यते सादिग्रंथेनेतिभावः॥=) २८ ग० प०

चरमदलं यथाध्यालोकधूमोभयलिंगकाद्वह्निविशिष्टपर्वतविषयका॰ मितिर्जायतां आलोकेनवह्निपरोभयविशिष्टपक्षविष
विषयकानुमितिर्धूमेनवह्निविशिष्टपर्वतविषयकानुमितिश्चजायतामित्यादौवारणा॥ तल्लिंगकत्वतत्साध्यविशि[illegible] क्ष
विषयकानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकान्यतमवत्त्वंतद्दले नविवक्षणीयं तथाच लिंगविशे
षानुपरक्तानुमितीछायास्तादृशविशेष्यताकान्यत्वविरहात् किंचिल्लिंगकत्वादिप्रकारकत्वनिवेशानर्थक्यं वेतितथा
विधविशेष्यताशालित्वेनैवेच्छायाउत्तेजकत्वमुचितं तथापितादृशविशेष्यताशालीछायामेवतदन्यमात्रेतिग्रंथस्यता
त्पर्यान्नासंगतिः शेषंपूर्ववदूह्यमवसेयं॥ ७॥ नन्वेवंधूमालोकादिलिंगकानुमितिसाधारणेकस्याः पक्षतायाः असंभव
इत्यत्रेष्टापत्तिमाह लिंगविशेषेणापीति लिंगभेदेनापिपक्षत्वंभिन्नमेवेत्यर्थः अपिः साध्यादिभेदसमुच्चायकः तत्प्रदर्शनं
चदृष्टांतार्थः तथाचसाध्यादिभेदेनेवलिंगभेदेनापिपक्षताभेदोनक्षतिकइतिभावः नन्वेवंलिंगभेदेनपक्षतायाअन
मलिंगकत्वालोकलिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकेछात्वेनस्वातंत्र्येणोत्तेजकत्वं॥)
नुमित्युपपत्तिः धूमालोकभस्माभिरनुमिनुयामित्यादीछाकालेउभयलिंगकपरामर्शादनुमित्यापत्तिवारणंच निर्वहतीत्ययंपाठः क्वाचित्कः॥२८)

नुगमानस्याव्यभिचारेणानुमितिरूपानुगतकार्यहेतुतासंभवः नच तत्साध्यकत्वादिवत्तल्लिंगकत्वस्यापि कार्यतावच्छेदके निवेशान्नव्य
भिचार इति वाच्यं तावतापि आलोकादिलिंगकानुमितीच्छाधीनधूमालोकोभयादिविषयक धूमाद बनपरामर्शजन्यानुमितौ धूमादि
लिंगकानुमितीच्छाविरहविरहविशिष्टसिध्यभावव्यभिचारस्य दुर्वारत्वात् तादृशानुमितावपि धूमादिलिंगकपरामर्शज
न्यत्वरूपधूमलिंगकत्वस्याक्षतत्वात् नच यत्र धूमलिंगकानुमितीच्छायाः उत्तेजकता तत्रालोकलिंगकानुमितीच्छावदापित
त्तल्लिंगकपरामर्शविशिष्टानामुत्तेजकतोपगमान्नोक्तस्थले व्यभिचार इति वाच्यं तथासति तत्र धूमलिंगकेच्छायामपि धू
मलिंगकपरामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात् सर्वसाधारणैकपक्षताया एव सुवचतया लिंगविशेषणापीति ग्रंथा
संगतेरिति चेन्न धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वमेव तादृशसिध्यभावजन्यतावच्छेदकं तादृशसि
द्धिविशिष्टत्वं च स्वसामानाधिकरण्य वह्निन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व संबंधेन उक्तरूपा तादृशबनस्थलीया
नुमितिस्तु तथाविधसिद्धिविशिष्टैवेति न तत्र व्यभिचारः सिद्धिकालेऽसत्यां तल्लिंगकसिषाधयिषायां उक्तस्थलेऽइव

२२ नथ भपरामर्शादे: मित्यापत्तिः धूमादिलिंगकेच्छाविरहविशिष्टसि[illegible]यत्वा
यौसानप्रयोजकत्वोपगमात् सं: हालंबनस्थ त्वआलोकपरामर्शघटित[illegible]तएवकार्यापत्तिनिर्वाहात् तिचेन्न अत्रा
त्राव्यवहितोत्तरत्वंअवश्यंतृतीयलक्षणसाधारणंस्वध्वंसाधिकरण कालध्वंसा धिकरण सति स्वाधिकरणकालत्वं सा
धिकरणत्वरूपं वाच्यंअन्यथा यत्क्रमेण सिध्यात्मकधूमालोकान्य लिंगकपरामर्शास्मल्लिंगकेच्छ नुमितयस्तत्राप्रमित्युत्प
त्त्यधिकरणक्षणस्यालोकलिंगकेच्छाविरहविशिष्टसिध्यधिकरणक्षणध्वंसाधिकरण क्षणध्वंसाधिकरणत्वेन त: पत्ति
कानुमितः एकसंबंधेनत्वा शसिद्धिविशिष्टान्यत्वा तादृशसिध्यभावस्य व्यभिचारतादवस्थ्यात् एवंच यत्क्रमेण सि
ध्यात्मकधूमपरामर्शधूमलिंगकेच्छानुमितयस्त: । स्यानुमितेर्धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वेन पक्षताका
र्यत्वानुपपत्तिरितिचेन्न तादृशसिद्धिविशिष्टत्वं नाम स्वा धिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वसंबंधेन वा

ध्यं उक्तसमूहालंबनस्थलेच अनुमितिपूर्वक्षण[illegible]लोकलिंगकेच्छाविरहविरहविशिष्टसिध्यधिकरणत्वात्तादृशक्षणध्वंसा
सत्यधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति नव्यभिचारः एवं सिध्यात्मक॰ ममात्रपरामर्शजन्यानुमितेर्धूमलिंगकेच्छ वि
रहविशिष्टसिध्यधिकरण[illegible]थमक्षणध्वंसासत्यधिकरण[illegible]त्तिकत्वाभावात्पक्षताका[illegible] निर्वाहः अथवा स्वं व्यव (अनुमिति)
हितपूर्वकालावच्छिन्नलिंगकेच्छाविरहविशिष्टसिध्यभावाधिकरणताविशिष्टसमवायएवसिध्यभावकार्यतावच्छेदकसंबंध इति
नकोपि दोषः अथवा स्ववृत्तिकृतिमत्त्वस्ववृत्तिप्रागभावप्रतियोगित्वस्वसामानाधिकरण्यैतत्रितयसंबंधेन तादृशसिद्धिविशिष्ट
न्यत्वं तादृशसिध्यभावजन्यतावच्छेदकमिति नकोपि दोषः अथवा तादृशसिद्धिविशिष्टत्वं स्वाधिकरणक्षणावा- च्छिन्नध्वंसाधि
करणक्षणध्वंसानधिकरण[illegible]त्तिकत्वसहितोत्तरत्वसंबंधेन वाच्यं [illegible]त्वेनेच तादृशसिध्याधि[illegible]क्षणावा-
च्छिन्नध्वंसाधिकरण मनुमित्युत्पत्तिक्षणएवेति तद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति नव्यभिचारः सिध्यात्मक
धूममात्रपरामर्शजन्यानुमितेर्धूमलिंगकेच्छाविरहविशिष्टसिध्यधिकरणक्षणावच्छिन्नध्वंसाधिकरणद्वितीयक्षण

ध्वंसानधिकरणक्षणोत्पत्तिकत्वविरहात् तद्विशिष्टसिद्धिविशिष्टान्यत्वमव्याहतमिति एवं यत्र धूमपरामर्शानंतरं तदप्रामाण्यावगाहि
२३ आलोकपरामर्शस्तदनंतरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाविशिष्टधूमपरामर्शविशिष्ट[illegible] अप्रामाण्यज्ञानाभावविशिष्टधूम
परामर्शजन्यतावच्छेदकाक्रांतत्वादव्यवहितपूर्वक्षणे चाप्रामाण्यज्ञानाभावविशिष्टपरामर्शासत्त्वेन प्रसक्तस्य व्याप्ति[illegible] तादृशोऽप्र
कारो वा [illegible]मवसेयः लिंगोपधानमते च न काचिदप्यनुपपत्तिः तन्मते धूमविशिष्टपर्वतत्वावच्छिन्नविशेष्यकत्वस्यानुमितित्वादेरेव धूम
लिंगकत्वविरहविशिष्टसिद्ध्यभावादिजन्यतावच्छेदकत्वादुक्तसमूहालंबन[illegible] चालोकवान् पर्वतो वह्निमानित्याकारकानुमि
तेरेवापगमे न व्यभिचारावकाश इति। धूमेनानुमिनुयामालोकेनानुमिनुयामित्यादीच्छासाधारणरूपेण [illegible] सिषाधयिषायां सि
द्ध्यावुत्तेजकत्वं तथा च धूमालोकादिलिंगकनिखिलानुमितिसा[illegible] तदैकैव पक्षता उक्तस्थलेऽतिप्रसंगभंगाय च [illegible] तिबंधकांतर
मेव कल्प्यत इत्याशयेनाह तल्लिंगकेति अत्र संसिध्याकुत्रयलिंगकानुमितीच्छाकालेऽनुमित्युपपत्तये सिद्धिकालीनेति सामा
नाधिकरण्यसंबंधेन सिद्धिविशिष्टेत्यर्थः समूहालंबनेच्छाकाले सिद्धिसत्त्वेऽनुमित्युपपत्तये तल्लिंगकानुमितीच्छाविरहविशिष्टेति।

(२) आलोके इत्युत्तरग्रंथसत्त्वादालोकलिंगकत्वादिप्रकारते स्वेवक्वाचित्कः पाठः ॥ = १)
धूमलिंगकत्वादिप्रकारतान्यप्रकारत्वानिरूपितविशेष्यताकेच्छाविरहविशिष्ट[redacted] सार्थकं तेन धूमालोकोभयलिंगकवह्न्यनुमितिर्जायता
मित्याद्य[illegible] ला सिद्धिकाले न केवलालोकलिंगकानुमितिप्रसंगः न चालोकेन वह्निर्घटो भायानुमिति धूमेन वाह्न्यनुमितिर्जा
यतामित्यादृशेच्छाकाले सिद्धिसत्वे केवलालोकलिंगकपरामर्शाके वलवह्न्याद्यनुमित्यापत्तिः यद्यपि तादृशप्रकार...निरूपितवि
शेष्यताकान्यत्वस्य विशेषणत्वोपगम एव समूहालंबनस्थलेऽनुमितिरूपपादयितुं शक्यते तथापि स्ता... छ्योर्यौगः[redacted] मंगी... व
तां नवीनानां मते यत्र सिद्ध[redacted] पत्तिकाले धूमलिंगका... [illegible] ...कलिंगका... मितीच्छायानुत्पादस्तत्रा
लोकलिंगकानुमि... पपत्तये तादृशविशे... तात्र लाच्छाविरहविरहविशिष्टपर्यंतानुधावने लिंगविशेषा... परक्तानुमितीच्छाना
मपि निरुक्तोत्तेजक[redacted] तावच्छेदकाकांर तया तादृशेच्छायाः प्रतिबंधकत्वाप्रसक्तेः अन्यालिंगकेति संपातायात् सिद्धिविशेषच्छमा
त्रस्य प्रतिबंधकत्वे सिद्धिविशिष्टघट तदनुमित्यादिगोचरेच्छाकाली... ननु [illegible] ...क्तितनाभावान् निवेशनीय
तया महागौरवमिति साध्यविशिष्ट... वह्निवि... यकत्वप्रकारकानुमितीच्छा... नव विशेष्यीभूतेच्छानिवेशो बोध्यः वस्तुतस्तु

साध्यविशिष्टपक्षविषयकत्वादिप्रकारकत्वमप्यन्यलिंगकानुमितीच्छायां न निवेशनीयं घटादीच्छाकालीनाननुगतेच्छानां भवन्म
२४ तेपि सिध्यनुत्तेजकतायाः साम्यात् मन्मते तन्न घटादीच्छा साधारण्यरूपेणैवानुमित्सायाः उत्तेजकत्वोपगमादुक्तस्थले पक्षता
निर्वाहेण तादृशाननुगतेच्छानामन्यलिंगकेच्छायां वोत्तेजकत्वात् अत्र च तादृशानुगतधर्मावच्छिन्नाभावस्य लिंगभेदेनानुक्तका
रणतानां पक्षताकारणतांतरस्य च कल्[illegible]लिंगभेदेन तत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपलघुधर्मावच्छि
न्नाभावहेतुकताकल्पनस्यैव सा[illegible] वरम् कयावाकारोऽनिर्भरस्रचना इति च वदंति परे तु [illegible] न्यलिंगक
त्वप्रकारकानुमितीच्छासमवहितसिद्धिदशायामननुगतानुमित्साबलात्तल्लिंगकानुमित्युपपत्तये सिद्धौ तादृशेच्छाभावकूटस्य विशेष्य
निवेशनेपूर्वमते गौरवमेतन्मते च [illegible]न्यलिंगकानु[illegible]रूपोत्तेजकबलादेव तत्रानुमित्युपपत्तेः सिद्धौ तादृशाभावानिवे
शात् न चैतन्मतेप्यन्यलिंगकानुमित्साप्रतिबंधकतायामेव तासामुत्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यं यतो यत्राननुग
तानुमित्सा सकलसमूहालंबनरूपेणान्यलिंगकानुमित्सा तत्रान्यलिंगकानुमित्सायां तादृशेच्छाव्यक्तिभेदा एव निवेशनीयाः सिद्धौ

तु सामानाधिकरण्यसंबंधेन तदसंताभावः तत्र च तत्तत्कालीनसंयोगादिव्यक्त्यभावानां निवेशमादाय विनिगम
नाविरहावकाशाद् इति वाच्यं सिद्धेरनंतरं यत्र समूहालंबनेच्छाव्यक्तीनामुत्पत्तिस्तत्र तादृशसिद्धिभेदानां सिद्धौ निवेशाद् इच्छोत्पत्तिका
लेऽनुमित्सापत्तेर्ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामग्र्या ज्ञानाविरोधित्वात्तु यादृशसमूहालंबनेच्छा सिद्धिजननकाले प्रतिबंधकोत्तेजक
योरेकस्याः अपरस्य हेतुत्वपूर्वमुत्पत्तिस्तत्र द्वितीयक्षणेऽनुमित्सुपपत्तये यत्तन्मतेऽपि तत्तत्सिद्धिभेदाः अन्यलिंगकेच्छाविशेष
णीभूतसिद्ध्यंशे निवेश्यते न तु अन्यलिंगकेच्छायां तन्निवेशे न सिद्धौ वा तदिच्छायां ताभावाः अतो न तत्कालीनसंयोगादिव्य
क्त्यभावनिवेशमादाय विनिगमनाविरहप्रसंग इत्याहुः। साधकमानपदस्य सिद्धिकारणपरत्वे पूर्वोक्तदोषप्रसंगात् तद्व्याचष्टे। सा
ध्यवत्तानिश्चयेति। साध्यवत्तानिश्चयः। प्रकृतसाध्यपक्षविशिष्ट्यावगाहिनिश्चयः पाषाणमयो वह्निमान् पर्वतः तेजस्वी इत्याद्याकार
कसमानप्रकारकनिश्चयदशायां पर्वतो वह्निमानित्याद्याकारकानुमितेरनुभवसिद्धतया यथाश्रुते च तदनुपपत्तेः। प्रकारविशेषं
निवेशयति। पाषाणमयत्वादीति। तत्र पर्वते तस्य वह्नेः धर्मित्वसाध्यत्वयोरुद्देश्यत्वविधेयत्वयोः अनुप्रवेशनीया विषयस्य पक्षताशा
रीरेत्यादिः। तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितिं प्रति तद्रू

पावच्छिन्नविशेष्यतानिरूपिततत्तत्संसर्गावच्छिन्नतत्तद्धर्मावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नस्य सिसाधयिषाविरहविशिष्ट
२५ स्याभावो हेतुरिति पर्यवसितं पर्वतो वह्निमानित्यादिसिद्धिदशायां वह्निमान् पर्वतो घटवानित्याद्यनुमित्युदयात्तत्तद्व्यक्तताव
च्छेदके प्रकारतामुपेक्ष्य विधेयतानिवेशने विधेयतायाश्च वह्निमनुमिनोमीत्याद्यनुव्यवसायनियामकपक्षतावच्छेदकत्वव्यावृत्तो
विषयताविशेषः स्वरूपतः पर्वतत्वादिप्रकारकसिद्धिदशायां जातिमान् वह्निमान् पर्वतो जातिमद्वानित्याद्यनुमित्युत्पत्तेः शुद्धप
र्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां अधिकविषयिण्याः सुंदरपर्वतो वह्निमान् पर्वतः सुंदरवह्निमानित्याद्यनुमितेरुत्पत्त्या
प्रतिबध्यदशि पर्वतत्वाद्यवच्छिन्नेत्यादिना किंचिद्विशेषितपर्वतत्वादिपर्याप्तावच्छेदकताकत्वमेव विवक्षणीयं तदर्थश्च पर्वत
त्वादिनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वं तेन जातिमान् पर्वतो वह्निमान् पर्वतो जातिमद्वह्निमानित्यनुमि
तेर्नानुपपत्तिः। पर्वतो वह्निमानित्यनुमितौ जातिमान् वह्निमान् पर्वतो जातिमद्वानित्यादिसिद्धेरप्रतिबंधकतया प्रतिबंधकादि
दशयापि पर्वतत्वाद्यवच्छिन्नेत्यादिना किंचिद्विशेषिततदवच्छिन्नत्वमेव विवक्षणीयं तदर्थश्च निरवच्छिन्नतद्धर्मावच्छेदकताक
त्वमिति ध्येयं। ननु पर्वतत्वावच्छिन्नविशेष्यताकानुमितौ पर्वतत्वावच्छिन्नविशेष्यताकसिद्धेः प्रतिबंधकत्वे पर्वते तत्तेनैकप

पर्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्वतेपि ——— साध्यानुमित्यनुदयापत्तिरत आह यदि चेति पर्वतत्वांशे अवच्छे
दकतावगाहि यत्किंचिद्धर्मि विशेष्यकसिद्धिदशायां तेन रूपेण धर्म्यंतरे अनुमित्यनुत्पादस्य निर्विवादत्तया सामाना २ कर
ण्येनेति एकत्र एककर्मणि अनुमित्सासत्वे विशेषणाभावादेव विशिष्टाभावनिर्वाहात् धर्मिविशेषनिवेशानमफलं अतो विनाप्य
नुमित्सामिति अन्यत्र अन्यधर्मिणि धर्मिविशेषानंतर्भावेपि वह्नेः [redacted] सा सामानाधिकरण्यनसिद्धिदशायां अवच्छेदकावच्छेद
नानुमितौ बाधकाभावान्नादरेति सामानाधिकरण [redacted] त्रावगाहीत्यर्थः धर्मिविशेषापीति तथा च पर्वतत्वावच्छिन्नत्वपर्वते
द्देश्यकानुमितौ पर्वतत्वावच्छिन्नत्वपर्वतादि विशेष्य साध्यवत्तानिश्चयत्वेन प्रतिबंधकत्वं कल्प्यत इति भावः अन्यथा त
दानीं तादृशानुमितेरानुभाविकत्वविरहे [redacted] धर्मिविशेषो निवेश्य इत्यनुषज्यते अनुमितिर्द्विविधा पक्षतावच्छेदकसाध्ययोः
नी सामानाधिकरण्यमात्रावगाहिनी तयोरवच्छेद्यावच्छेदकभावावगाहिनी च अवच्छेद्यावच्छेदकभावोपि कश्चित् रूपसंबंधवि

५ (व्याप्ति [illegible] प्रतीतिप्रमापत्तिस्तु प्रकारप्रतियोगिकत्वविशिष्टसमवा [illegible] नावारणीया॥) ५

दोषः यथा मूलावच्छिन्नो वृक्षः [illegible] संयोगी यादो [illegible] लावच्छिन्न संयोगाश्रयोऽस्तत्रान्यस्य दुर्वचत्वात् तदवगाहिन्या [illegible] चानुमितेः पक्षता [illegible]

२८ दक [illegible] छेदनबाधग्रहस्य विरोधि [illegible] स्यासिद्धिव्यभिचारासंकर [illegible] णिकत्वव्यवस्थापरि [illegible] ति कश्चित् व्याप्यव्या

पकभावः यथा [illegible] थिवी रूपवती [illegible] थिवीत्वादित्यादौ तत्र [illegible] क्षतावच्छेदकस्य स [illegible] धर्मिपारतंत्र्येणावच्छिन्नत्वसंबंधविधया प्रकारस्या

भासते अतोऽवच्छेदकावच्छेदेनानु [illegible] वत्पर्वतो वह्निमा [illegible] अथवा [illegible] तत्समानसाध्य

संबंधे संबंध [illegible] वच्छेदकावच्छिन्न [illegible] नं पक्षतावच्छेदकावच्छिन्नत्व [illegible] ध्यीयत्वे नैव वापदे तत्संबंधभानमित्यन्य

त्र विवेचितं अवच्छेदकावच्छे [illegible] मितिश्च सामानाधिकरण्यमात्रविषयक सिद्धिदशायां [illegible] पि जायते न्यूनविषयक सिद्धिदशायामधि

कविषयकानुमितेः सर्वानुभवसिद्धत्वात् अत एव यत्रावच्छेदकावच्छेदेना [illegible] मितिरुद्देश्या तत्र नांशतः सिद्धसाधनं दोषः मणिकृतैव प

थिव्यामितरभेदानुमाने वांशे [illegible] सिद्धसाधनमाशंक्य सर्वा [illegible] थिवीतरभिन्ने युद्देश्य प्रतीतेरभावात् पक्षतावच्छेद [illegible] हित

दितिसमाधानस्य वक्ष्यमाणत्वा■दित्यतस्तदेवोपपादयति पक्षतावच्छेदकस्येति सामानाधिकरण्येन सामानाधिकरण्यमात्रेण
तदवच्छेदेन पक्षतावच्छेदकावच्छेदेन सिद्धेः सिद्धेरेव सामानाधिकरण्यमात्रावगाहिसिद्धेः प्रतिबन्धकत्वमेवकारव्यवच्छेद्यं अयं भावः
पर्वतो वह्निमानित्यादिसिद्धिदशायां पर्वतः सुंदरः वह्निमानित्याद्यनुमित्युत्पत्त्या विधेयतावच्छेदकतायाः पर्याप्तेः प्रतिबध्यतावच्छे
दककोटौ निवेशनीया एवं संयोगादिना वह्नेः सिद्धावपि समवायसंयोगादिनावह्न्यनुमित्युत्पत्त्या संसर्गतायाः अपि पर्याप्तिर्निवेश
नीया एवं संयोगादिना साध्यस्य दंडोपलक्षितपुरुषादेः सिद्धावपि विशिष्टनिरूपितसंयोगादिना दण्डिपुरुषाद्यनुमित्युत्पत्त्या अव
च्छेदकतायाः पर्याप्तिर्निवेश्या एवं च अवच्छेदकावच्छेदेनानुमितौ शुद्धवह्नित्वादौ शुद्धसंयोगत्वादौ चावि■च्छेदकतायाः संसर्ग
तावच्छेदकतायां वा अ■त्वात् तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति प्राचस्तु व्यापकतायाः
संसर्गतया भाने मानाभावात् पक्षतावच्छेदकाक्रान्तयावद्व्यक्तिविषयकानुमितेरेव पक्षतावच्छेदकावच्छेदेनानुमितित्वमिति वदन्ति त
न्मते मणिकारोक्तन्यायेनांशतः सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकानुमितावदोषत्वे■दकव्यापको
द्देश्यताकान्यतमेव सिद्धिसामान्यप्रतिबध्यतावच्छेदककोटौ निवेशनीयं न च विषयभेदेन विषयताभेदात् पक्षतावच्छेदकावच्छे

देनानुमितेर्विषयतानामपि नानाव्यक्तिपक्षकस्थले पक्षतावच्छेदकाव्यापकत्वमेवेति तत्र पक्षतावच्छेदकव्यापकोद्देश्यतायाः अप्रसिद्धिरिति वाच्यं
२८ उद्देश्यतासंबंधेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वेनोपगमेन निर्वाहात् दीधिकारस्य तु अवच्छेदकावच्छेदेनानुमिताववच्छेद्या
वच्छेदकभावस्य स्वरूपसंबंधस्यैवव्य[redacted]भावरूपस्यापि भानमनुमतं भागासिद्धेर्दोषत्वनिर्वाहार्थं[redacted]दकावच्छेदेनानुमितौ पक्षता
वच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणतायाः आवश्यकत्वात् शिखराविशिष्टः पर्वतो वह्निमानित्यादौ शिखरे हेतोस्तत्संबंधस्य वा ~ च्छेदकताविर
हेण हेत्वसिद्धेरावश्यकत्वेऽप्यत्राश्यपक्षतावच्छेदकेनातिरिक्तवाच्यत्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायाः
भागासिद्धेर्दोषत्वार्थमुपगमे स्वरूपसंबंधरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ता[redacted]क्षा नोपपद्यत इति
समाधानस्य स्वयमवच्छेदकत्वयोर्वस्तुतो भेदादित्यनेनाग्रे वक्ष्यमाणत्वात् एवं ~~साध्यवत्ता~~ भानस्य तदननुमतत्वे पर्वतत्वसामानाधिकरण्येनैक
त्रैसत्र एकत्र साध्यसिद्धावित्यनेनैवावच्छेदकावच्छेदेनयासिद्धिस्तत्स्वभावलाभेन तल्लाभप्रयोजकस्य सामानाधिकरण्येनत्युपादानस्यानर्थक्या
त्र्युज्यते चैतदेवमतं प्राचीनमतेऽपि उक्तयुक्त्या ~~विधेयतावच्छेदक~~ादिपर्याप्तिनिवेशस्यावश्यकत्वात् तादृशोद्देश्यताकान्यत्वस्याधिकस्य निवेशानी
यतयागौरवात् एवं सिद्धिसामान्यस्यान्यदृशयां अवच्छेदकावच्छेदेनानुमितावुपस्थमानयांसिद्ध्यभावबलात्कार्यतावच्छेदकीभूतपक्षतावच्छे

दकव्यापको हेतुताकान्यानुमितित्वावच्छिन्नस्यापत्तेश्च अस्मन्मते च सिद्धिसामान्याभावकालीनावच्छेदकावच्छेदेनानुमितौ विशिष्टवह्नित्वविशि
ष्टसंयोगत्वेवापर्याप्तिविषयताविशेषवत्धूमवह्नित्वेतत्धूमसंयोगत्वेवापर्याप्तेपि विशिष्टतावेशेषः स्वीक्रियते एकज्ञानस्य एकविषये विषय
ताद्वयोपगमेप्यतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोऽसंनिरिष्टेव । चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाः संसर्ग
तयाभानोपगमे तादृशानुमितावच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणताकल्पने गौरवं एतन्मते तत्तत्सर्वतो द्वयकानुमितौ तत्तत्स
र्वत्वविशेष्यकपरामर्शस्य हेतुतया अर्थवशादेव यावत्सर्वत्वविषयकपरामर्शात् तथाविधानुमितौ [illegible] तादृशानुमितौ परामर्शस्य स्वातन्त्र्य
हेतुताकल्पनात् व्यापकतायाः संसर्गविधया भानस्य क्वचिदप्यनुपगमादिति वाच्यं यत्रैकपरामर्शः कतिपयपक्षविषयकः अन्य
श्चेतदितर[illegible]विषयकस्तत्र [illegible]वच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः न चेष्टापत्तिः अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानं विना अवच्छेदका
वच्छेदेनानुमित्यनुत्पादस्य सर्वसिद्धत्वात् तत्रैकस्यापि परामर्शस्य न तत्सिद्धाया अवच्छेदकावच्छेदेन हेतुमत्तावगाहितायाः असम्भवा
त् एवं यत्र पक्षतावच्छेदकताघटकसंबन्धेन पक्षतावच्छेदकमवृत्ति तत्रैतेन संबन्धेन पक्षतावच्छेदकाक्रान्तासिध्या अनुमितिहेतुसिद्ध्यानुप
पत्तिश्चेत् तन्मते अपि चावच्छेदकावच्छेदेनानुमित्या अवच्छेद्यावच्छेदकभावरूपाधिकविषयतानवगाहनसामानाधिकरण्यमात्रेणासि

२८ धिदशायां तादृशानुमित्युपजीव्यबीजाभावः सिध्यविषयीभूतधर्मिविषयकत्वस्य तद्बीजत्वे तथाविधसिद्धिदशायां कतिपयपर्वतादिविष[य]का
नुमितेरप्युत्पादो चितयात् तस्मादवच्छेद्यावच्छेदकभावावगाहिज्ञानमेवावच्छे अवच्छेदेन ज्ञानमित्युच्यत इति अथ मणिकृताच तावच्छ
दकैक्यंत्रातः सिद्धसाधनस्य अदोष तदितरप्राचीनैरनुमितिमात्र एवात्रातः सिद्धसाधनस्यादोषत्वमुपेयम् अत एव तेषाम
तमवलंब्य मणिकृतापि शब्दानित्यसाध्यनुमाने ध्वन्यादावत्रातः सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं प्रदानेनैवात्रोक्तं अ
तएव गंधादिरूपपक्षतावच्छेदकस्य पृथिव्यामितरभेदादौ हेतुता नाचार्यैरनुमन्यते व्याप्तिग्रहे हेतुतत्पक्षतावच्छेदकसा
ध्ययोः सामानाधिकरण्यभानेन सिद्धसाधनात् सकलपृथिवीविषयकानुमितेरयोगात् न चात्रातः साध्यसिद्धावप्यधिकधर्मिविषय
कतया बहुपर्वतादिविषयकानुमित्युत्पाद उचितः अधिकधर्मिविषयकानुमितेः सिद्धिदशायामुत्पादे च बाधकं त्यादिसिद्धिदशाया
मनित्यत्वानुमानस इत्यादिस हालंबनानुमित्युत्पादस्योचितत्वान्न हि तत्र करस्याप्यनुमितिः नवीनैरपि पक्षतावच्छेदकैक्य एवात्रातः सि
द्धसाधनस्य अदोषत्वोपगमात् एवं च नवीनमते अवच्छेदकावच्छिन्नत्वावगाहितदनवगाहि अनुमितिभेदेन पक्षताभेदस्य स्वीकरणी
यतया गौरवं न च विशिष्टबुद्धौ धर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहि बाधदशायां तत्सा

मानाधिकरण्येन तादृशबाधाविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव सकलधर्मिविषयकानुमितेरप्युत्पा
दौ चेष्यादवच्छेदकावच्छेदेनानुमितावुद्देश्यतायामप्यंशतो बाधस्यादोषत्वापत्तेरिति वाच्यं सामानाधिकरण्यमात्रावगाहिन्यां बु
द्धौ समानविषयकतथाविधविपरीतनिश्चयप्रतिबन्धकतायाः प्राचामनुमततया अंशतो बाधस्य दोषत्वोपपत्तेः एवं च यावत्पक्ष
विषयकानुमितौ यावत्पक्षविषयकहेतुः ताद्वशनापेक्षायां तद्विरोधितया भागासिद्धेरपि दोषता निर्वाहः एवं यत्र सकलपर्वता
नां नैकपरामर्शविषयता अपि तु परामर्शद्वयविषयता तत्र यावत्पर्वतविषयकानुमिति[illegible]वच्छेदेनानुमितिः प्राचीनमते
इष्टैव नवीनमतेऽपि तत्र तादृशानुमितेरावश्यकत्वादिति अवच्छेद[illegible]वच्छेदेनानुमितौ ता[illegible]परामर्शस्यैव हेतुत्वकल्पनेनापि तन्मते
लाघवमेवं अवच्छेदकावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वभानस्य सामानाधिकरण्ये न विपरीतज्ञानप्र
तिबन्धकत्वप्रयोजकत्वासंभवेन तत्प्रयोजकत्वस्य दुर्वचत्वापत्तेः न चैकरूपेण समानधर्मिविषयकत्वं वा विपरीतज्ञानप्रति
बन्धकत्वबीजं तथा सति पार्थिवगन्धत्वावच्छेदेन जलावृत्तित्वादिनिश्चयस्यापि पृथिवीगन्धत्वावच्छेदेन तन्निश्चयस्येव गं
धो जलवृत्तिर्न वेत्यादौ गन्धत्वादिसामानाधिकरण्यमात्रेण जलवृत्तित्वादिसंशये विरोधिताप्रसंगात् उभयोरेव निश्चय
योर्गन्धत्वादिना तदाश्रययावद्धर्मिणि गन्धाभावावगाहितया न विशेषात् विरोधिविषयकत्वादि विशेषधर्मितावच्छेदक

ग०प०

१ द्वितीयस्य विरोधित्वे प्रथमस्यापि तथात्वौचित्यात् १

त्वा१

कोटावधिकभानस्य विरोधितावीजत्वाभावात् नव्यनये उभयानिश्चये व्यापकतयोर्भेदेन विशेषसंभवात् एतेनावच्छेदकावच्छे-
नानुमितौ व्यापकस्य भानापेक्षया लाघवात् यावद्धर्मेषु [illegible]नुगतैकविषयताभ्युपगम एवोचितः तदन्यो[illegible]यतेव सिद्धि-
२९ सामान्यप्रतिबध्यतावच्छेदिका सिद्धिसामान्याभावकालीनानुमितौ च तादृशी एकैकधर्मिवृत्तिविषयताऽपी[illegible] इति
नकोपि दोष इति परास्तं पक्षतावच्छेदके सामानाधिकरण्येन तदवच्छेदेन च सिद्धिदशायां सामानाधिकरण्यमात्राव-
गाहिन्यनुमितिर्जायते [illegible] सिद्ध्योः पक्षतावच्छेदकवृत्तिसाध्यसंबंधरूपतदंश[illegible] सामानाधिकरण्या[illegible]गाहित-
या तादृशानुमितेस्तदतिरिक्तानवगाहित्वात् अतस्तथाविधानुमितावुभयविधसिद्ध्योरेव प्रतिबंधकत्वं दर्शयति।
तत्सामानाधिकरण्येनेति तत्सामानाधिकरण्यमात्रेण पक्षतावच्छेदकमात्रेण [illegible]दकावच्छेदेनानुमितेरपि सामाना सामानाधिकरण्य
धिकरण्यावगाहित्वात् तद्व्यावर्तनायावच्छेद्यावच्छेदकभा[illegible]वगाहित्वस्य व्यवच्छेदार्थकं मात्रपदं अवच्छेद्यावच्छेदकभावान-
[illegible]वगाहित्वं च न सिध्यभावजन्यतावच्छेदककोटौ निवेशनीयं उक्तदिशापत्तिसंभवात् यत्किंचिन्निवेशादेवोपपत्तेर्वैयर्थ्याच्चे[illegible]वये
यं सिद्धिमात्रस्येति मात्रपदं कृत्स्नार्थकं तथाच पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धेरित्यर्थः प्रतिबंधकताया

१अथ विधिसिध्योः संसर्गतादीनां पर्याप्तिमनिवेश्यैकरूपेणैव यथोभयसाधारणनिश्चयत्वं शक्यते निर्वक्तुमन्यथा पृथक्पृथगेवेति
ध्येयं यत्तु सामानाधिकरण्येनानुमितौ तथा विधिसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्यावृत्तरूपेणाप्रतिबंधकत्वेपि तत्रावच्छेदकावच्छे
देन सिद्धेर्न प्रतिबंधकताधिक्यं अवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबंधकत्वेकल्पनीये अवच्छिन्नसंयोगादिपर्याप्तसंसर्गता
कतस्य प्रतिबध्यतावच्छेदके [illegible] निवेशनीयतया अवच्छिन्नत्वाद्यतिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गतावच्छेदकतस्यैव
च तदर्थतया शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबंधकतयैवोपपत्तेरिति तदसत् सामानाधिकरण्येना
नुमितौ यामवच्छेदकावच्छेदेनानुमितौ यामित्याकारकेच्छानां पृथ[illegible]थगुत्तेजक[illegible] यावक्ष्यमाणतया पृथक्प्रतिबंधकताकल्पनस्या
वश्यकत्वात् ननु सिद्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमितिर्जायतामित्याकारकेच्छाविरहे सतिच्छावच्छेदकावच्छेदकाव
च्छेदेनैवानुमत्वापरामर्शे सामानाधिकरण्यमात्रावगाहिपरामर्शात्तादृशानुमितेरापत्तिः तादृशासिषाधयिषासहितपक्षतायाः
पक्षतया अंगीकारे इष्टं चेति इष्टं च उक्तयुक्त्या पक्षतावच्छेदकावच्छिन्नत्वतत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः
पृथक्पृथक्प्रतिबंधकत्वे चेत्यर्थः लिंगभेदन्यायइति यथा च तत्र लिंगकानुमितौ सिद्धेः प्रतिबंधकतायां तत्तल्लिंगकानु
मितीच्छैवोत्तेजिका न त्वन्यलिंगकानुमितीच्छा तथा पक्षतावच्छेदक[illegible] सामानाधिकरण्यमात्रावगाहिनीमनुमितिं प्रति सिद्धेः प्रति

बंधकता[redacted]याँ तादृशानुमितीच्छेवोत्तेजकाभावान्यविधानुमितीच्छितिरवीकरणीयमिति नातिप्रसंग इत्यर्थः यदि पर्वते वन्हिरित्याकारक
निश्चयानंतरं पर्वतो वन्हिमानित्याद्याकारका॰मितिर्जायेत तदा साध्यविशेष्यका॰ मितौ साध्यविशेष्यकसिद्धेः प्रतिबंधकत्वेपि
३० सामान्यतः साध्यपक्षवैशिष्ट्यावगाह्यनुमितौ तादृशसि[redacted]तिबंधकत्वं कल्पनीयं अपि तु विशेष्येव प्रतिबंधकताद्व
यं अगत्या गौरवस्यादो॰ शादिसाशयेनाह साध्यविशेष्यकेति द्वयोः समानविषयकत्वे विशेष्य[redacted]भाववैपरीत्ये मा किंचि
त्करमिति[redacted] निर्भरस्सूचनाय प्रामाणिकत्वंत्युक्तं मणिकारस्य तु समानप्रकारकसिद्धेरेव॰तिबंधकत्वम॰ मतं पृथि
व्यामितरभेद इति साध्यविशेष्यकानुमित्यनंतरं[redacted]का[redacted]पालानस॰कतात् व्यतिरेकपरा॰शीदिव पाथ वीतरणि
नेति पक्षविशेष्यकानु[redacted] तेन व्यतिरेकिग्रंथे वक्ष्यमाणत्वात् पक्षविशेष्यिकैवेति तथा च विशेष्य॰कारताविं
शेषं निवेश्येव प्रतिबध्यप्रतिबंधकभावः कल्पनीय इति भावः तत्र तादृशानुमित्यभावस्य प्रामाणिकत्वे तूभयविधज्ञानसा
धारणपक्षसाध्यवैशिष्ट्यावगाहि निश्चयत्वस्यानतिप्रसक्तस्य सुवचत्वे उभयविधासि[redacted]तिबंधकताप्र
तिबध्यतावच्छेदकं तु पक्षविशे[redacted]कारकानुमितित्वादिकमेव न तु॰ गतं पक्षमित्र॰कसाध्यप्रका॰ कानुमिति

र्शीयतां साध्यविशेष्यकपक्षप्रकारकानुमितिर्शीयतामित्यादिकयोरिच्छयोः पृथ[illegible]थगुत्तेजकत्वानुरोधात् [illegible] साध्यविशेष्यकसि
ध्यनंतरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वेच तुल्यन्यायादिति पर्यवसानादियं तस्य हेतुः [illegible]नाकारकसिद्धे [illegible] अ
न्यूनाकारकसिद्धेरित्यर्थः पर्वतः संदरवान्हिमानित्यादिसिद्धेरग्रायामपि न्यूनविषयिण्याः पर्वतोवन्हिमानित्य्ऽनुमितेर
नुत्पादादधिकविषयकसिद्धेर्विरोधित्वे[illegible]दकावच्छेदेन सिद्धेः सामानाधिकरण्येनानुमितौ प्रतिबंधकतालिखन
स्यासंगतेः अतएव जातिशक्तिवादे गोत्वेन गोवृत्तित्वानुमानं सिद्धसाधनान्न संभवति अविशिष्टहेतुना विशिष्टसाध्यसा
धनएव सिद्धसाधना[illegible]कांशो ननु विशिष्टेनाविशिष्टसाधनोपीति जागद्याध्यत्स्यनुमानपक्षमाक्षिप्य मिश्राः अथाप[illegible]सि
द्धिरिति मूलमेव तारया [illegible]ः [illegible]साध्यविशेष्यकानुमितिः सर्वत्र नानुभवसिद्धा पर्वतोवन्हिमानित्याकारकानुमितेरेवानु
भवात् व्याप्यविशेष्यकपरामर्शादपि पक्षविशेष्यकानुमित्युत्पादस्य परामर्श[illegible]नुगतरूपे[illegible]वादिनोपिसं
मतत्वात् किंत्वत्र सिद्धसाध्यकस्थले विशेषणज्ञानादिविरहेण साध्यविशेषणकानुमितेरनुपपत्त्या साध्यविशेष्य
कानुमितिरुपेयते [illegible] पक्षविशेष्यकसिद्धिदशायामपि तादृशानुमितेरप्रामाणिकतया तदनभ्यु[illegible]मक्षाति विर

३१ हानुत्तांप्रतिसाध्यपक्षवैशिष्ट्यवगाहिज्ञानत्वेनोभयविधसिद्धिसाधारण्येनापि प्रतिबंधकत्वसंभवत्तीत्यभिप्रेत्य मतां
तरमाह [redacted] नुमिति [redacted] साध्यविशेष्यकानुमितिमि त्यर्थः [redacted] पक्षविशेष्यिकासाध्यविशे... काचित्सिद्धि
रित्यर्थः [redacted] केवलसाध्यज्ञानदशायामपि साध्यविशेष्यिकानुमितिरप्रामाणिकी तत्र साध्यविशेषणकानुमितेरेव
संभवादिति तादृशानुमितिप्रतिबं [redacted] दिविषयतायाः ... साध्यविषयिताविरहस्य निवेश्यत्वस्य च निवेशे गौरवा
येत्यभिसंधायाह [redacted] सि [redacted] साध्यतावच्छेदकप्रकार... ज्ञानमित्यर्थः तेनेतरत्वव्याप्यवत्त्वाभावप्रतियो
गिपृथिवीत्ववत्त्वान्न पृथिवीत्यादि ______ परामर्शादेव... दिना साध्यज्ञानसत्वेपि पृथिव्यामितरभेद ... इत्याकारका
नुमितेर्नानुपपत्तिः [redacted] तत्र पृथिवीतरभिन्नेत्याकारकानुमितेः संभवः विशेषणतावच्छेदकीभूतेतरभेदत्व प्रकारकज्ञानवि
रहात् [redacted] तरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वावच्छिन्नमुख्यविशेष्यकानुमितिज्ञानसं प्रतिबध्यतावच्छेदकं ... त
थाविधज्ञानदशायामितरभेदादिपक्षकप्रमेयत्वसाध्यकानुमितेरप्यनुपपत्तिः तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेपी
तरभेदः प्रमेयः पृथिवीतरभिन्नेत्यादिसमूहा [redacted] नानुमिते गोत्वाभावो गोत्वाभाववानित्यनुमि... नुपपत्तिः ______ तेष्वा

त्पृथिवीतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यतावच्छेदकताभिन्ना मुख्यविशेष्यतानिरूपित
प्रकारत्वेव विधेयता साध्यविशेष्यकानुमितौ च तत्तान्या [redacted] प्रकारताभिन्नविधेयत्वेव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति ना
नुपपत्तिरि — [redacted] प्रकारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेदइत्याकारकतेजोभेदादिसाध्यविशेष्यकानु॰ ते जल
भेदादिविधेयकत्वापातात् [redacted] आधेयतासंबंधावच्छिन्नप्रकारताव्यावृत्तेत्यादि — तथा सत्याधेयतासंबंधेन जलभेदादिसा
ध्यकतादृशानुमितेरपि तद्विधेयकत्वानुपपत्तेः — यत्राधेयत्वं साध्यतावच्छेदकसंबंधः तत्र विधेयत्वमतिरिक्तमित्युच्यते तदा तत्सं
बंधेन जलभेदादिसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिध्यभावव्यभिचारो दुरुद्धरः — तद्धर्माव
च्छिन्नप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं साध्यप्रसिद्धिस्थले साध्य
प्रकारिकैवानुमितिर्जायते न तु तदप्रकारिकेति न तत्र व्यभि[redacted]चारः — साध्यविधेयकानुमितौ साध्यप्रसिद्धेः प्रतिबंधक
त्वादेव [redacted]साध्यक [redacted] अभावरूपसाध्यप्रसिद्धिस्थले न तु भावसाध्यकस्थले इत्यर्थः तत्र परामर्शस्य नियमतः साध्य
घटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिध्योः साध्यप्रसिद्धिप्रतिबंधकतायाः कल्पयितुमशक्यत्वादुपष्टंभक
त्वासंगतेः स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्याप्त्यधिकरणत्वरूपाविच्छिन्नप्रत्यासत्त्याऽनुमितिं

प्रतिविषयतावच्छेदकतासंबंधेन ज्ञानस्य सर्वसाधारण्येन प्रतिबंधकतायाः आपाततः उक्तिसंभवेपि साध्याघटकव्यतिरेकव्याप्तिविषयकपरा
मर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्युत्पादप्रयोजकतायाः क्लृप्तत्वात् अभावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसिध्या अनु
३२ मितेः साध्याविशेष्यकत्वतादृशाप्रतिबंधकतायाः अप्रयोजकत्वादुपसंगतिता स्यात् [redacted]नु यत्र ज्ञानसायवन्हिमात्रविषयकः
परामर्शस्तत्र पक्षधर्मताबलात्पर्वते पर्वतीयवन्हेर्भासमानो विशेषणज्ञानविरहेण विशेष्यतयैव भासत इत्यभावसाध्यकस्थलेपि सा
ध्यविशेष्यकानुमितिसंभव इति [redacted] सामान्यलक्षणायाः प्रत्यासत्तित्वमतेन महानसीयवन्हिविषयकपरामर्शेपि पर्वतीयवन्हिभानप्रयो
जकस्य दुर्लभत्वात् [redacted]स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तद्भानसंभवः उद्बोधकस्य फलबलकल्प्यत्वात् विशिष्टविशे
षणकबुद्धौ विशेषणज्ञानहेतुतायाः निर्युक्तिकत्वात् विशेष्यतावच्छेदकप्रकारकज्ञानस्य चाक्षतत्वात् पर्वतीयवन्हिविषयकपरामर्शा
दपि वन्हित्वेन तद्वन्हिविशेषणकानुमितिसंभवाच्च [redacted] साध्याप्रसिद्धिप्रतिबंधकतायां साध्यविशेष्यकानुमितित्वप्र
कारकत्वाद्योरनैकत्वमावश्यकं पक्षविशेष्यकसिद्धिदशायां तादृशोद्देशे साध्यविशेष्यकानुमितेरपलापापत्तेः सिद्ध्यस
मवहितसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः संभवेन तत एव वा त्रयसंशयनिवृत्त्यादिसंभवे साध्यविशेष्यकानुमि
त्यनुपगमेपि न क्षतिः करइत्यभिसंधायैव साध्यप्रसिद्धेस्तादृशोधेत्वमुररीकृतं घटता प्रकृते च साध्यविशेषणकानुमित्युत्प

दासंभवेन तादृशानुमित्यपलापानौचित्यात् यत्र सिध्यसमवहिता साध्यप्रसिद्धिस्तत्रानुमितौ तत्र व्यतिरेकिपरामर्शे साध्यविशे
ष्यकातद्विशेषणकाचानुमितिरापाद्येत न ह्येकविधादेव परामर्शादेकदा द्विविधानुमितिरानुभविकी तस्माद्व्यतिरेकिपरामर्शे साध्यप्र
सिद्धिदशायामपि साध्यविशेष्यिकैवानुमितिरस्त्वतः समुचितः सिद्धेः प्रतिबंधकतापेक्षया साध्यप्रसिद्धेः प्रतिबंधकतायामवच्छे
दकलाघवमप्यकिंचित्करमेव व्यतिरेकिपरामर्शस्थले च साध्यविशेषणकानुमितिस्वीकारे तादृशानुमितिं प्रति व्यतिरेकिलिंगतान्व
यिलिंगतादि[redacted] नुमितौ पृथक्पृथग् जनकीभूय सिद्धेः प्रतिबंधकताद्वयेनैव गौरवात् नुज अप्रसिद्धसाध्यकस्थलेपि साध्य
विशेषणिकैवानुमितिर्ज[redacted] रभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेपि विशेष्ये विशेषणं तत्र च विशेषणांतर
मितिन्यायेन पृथिवी इतरभिन्नेत्याद्यनुमितिसंभवात् लाघवानवकाशः तादृशानुमितिं प्रत्येव साध्यप्रसिद्धिप्रतिबंधकता
या यासनत्वं कल्पनीयत्वादिति तथाविधानु तौ [redacted] दृशीविषयता तस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमि
तिसाधारण्यापगमात् साध्यविशेष्यकानुमित्यनुपगमे साध्यप्रसिद्धिप्रतिबंधकताएवाकल्पनात् सिद्धिकाले तथाविधानुमि
तेर्वारणाय तत्र सिद्धेः साध्यप्रसिद्धेर्वा प्रतिबंधकत्वकल्पनमावश्यकं मितिका विशिष्टवैशिष्ट्यावगाह्यनुमितिस्थलीय
सिद्धिप्रतिबंधकतयैवोपपत्तेः इतरभेदत्वादिना इतरभेदविधेयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकत्वस्या यसा
धारणत्वादिति नु विशिष्टवैशि ावग ह्यनुमितौ विशिष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी ननु केवलं विशेष्ये विशेष

पमित्यादिरीत्या ज्ञायमानापि स्यात् तथापि तस्याः संसर्गांशे विशिष्टनिरूपितत्वानवगाहितया न्यूनविषय[illegible]त्वात् [illegible]के
३२ वलं विशेष्ये विशेषणम् इति न्यायेनानुमितेरुपगमे तादृशसिद्धिदशायां तस्याः [illegible] तया तत्र तादृशसिद्धेर्विरोधि
त्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण तत्स्वीकारे विशिष्टवैशिष्ट्यानवगा
हिसाध्यविशेषणकानुमितेरनभ्यु[illegible] प्रतिबध्यप्रतिबंधकभावस्यामिति त[illegible]विशिष्टनिरूपितवैशिष्ट्यज्ञा
नमात्रविरोधि बाधादिकाले केवलं विशेष्ये विशेषणम् इति न्यायेनानुमितेः सर्वसंमततया तत्र तादृशसिद्धेः प्रतिबं
धकतायाः आवश्यकत्वेन साध्यविशेष्यकानुमितिस्वीकर्तुरधिकप्रतिबंधकताकल्पनस्य दुर्वारत्वादिति [illegible]वि
शिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणकज्ञाने विशिष्टज्ञानं: प्रसिद्धं तदानुल्ययु
क्तया विशिष्टविशेष्यकज्ञानेऽपि विशिष्टविशेष्यज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिः सिद्ध
साध्यकस्थले न संभवतीत्यत्र विशेष्यज्ञानस्य वैशिष्ट्यबुद्धौ हेतुः तथा तद्विशेषणस्यापि न तद्विशेषहेतुतेति वाच्यं

सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानैरस्य व्यभिचारेण सामान्यहेतुतासंभवेपि तत्स्वरूपेणाय विशे[illegible] भाव
गाहिज्ञानस्यापेक्षकविशिष्टपरविशेषणकत्वावच्छिन्नाय विशेषहेतुतायाः आवश्यकत्वात् [illegible] विशेषणज्ञान
स्यापि विशिष्टज्ञानहेतुतायाः उच्छेदात् [illegible] विशिष्टवाक्यार्थविशेष्यकशाब्दबोधे [illegible] ज्ञानापे
क्षा[illegible] साध्यविशेष्यकानुमितौ तुल्य[illegible] चारेव पक्षविधेयतावच्छेदकयोः साध्यांशेप्रकारतानतिकविशिष्टां
शेऽप[illegible] स्यापि न विशिष्टविशेष्यज्ञानापेक्षेति वाच्यं निर्विशेष्यतावच्छेदककानुमितेरनुभवविरुद्ध[illegible] धारस्य
च निर्धर्मितावच्छेदककस्याप्य[illegible] पगमात् प्राथमिकाभा[illegible] तियोग्यधि[illegible] भावविशेषणतयाभानो
पपत्तेः [illegible] साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति [illegible] जलव्यापकीभूताभावप्रतियोगिपृथिवीत्व
वती इत्यादिपरामर्शानन्तरं जलत्वादिरूपावच्छेदकज्ञानं विनापि स्वरूपतस्तत्प्रकारिका पृथिव्यां जलभेदइत्याकारिकाऽ
नुमितिरेव कथमुपपद्यतां इति चेत् [illegible] कथंचित् तत्र जलीयत्वमात्रपुरस्कार[illegible] भावानुमित्युपगमादिति संक्षेपः।

ननु सिषाधयिषाविरहविशिष्टसिध्यभावरूपक्षताया अपि संदेहवपरामर्शपर्वं इत्यादि ग्रंथेन सिषाधयिषापक्षतापक्षो
३४ करयव्यभिचारस्य सिध्धिकालीनानुमितिस्थले तादवस्थ्यं सिषाधयिषानाशे विशिष्टप्रतिबंधकस्य अनुमित्यव्यवहित
प्राक्क्षणे असत्वादित्याशेपयन्नुपपत्तिसमाधानमाह अथवेति व्याप्तिस्मरणादीत्यादिना अनुमित्साद्वितीयक्षणे ग्रंथे
क्षधर्मता ज्ञाने तत्स्थलीयेतादृशज्ञानपरिग्रहः तेनेति व्याप्तिस्मरणादिपूर्वकालीनेत्यर्थः परामर्शद्वितीयक्षणे सिधौ
विशेष्याभावादेव विशिष्टाभावनिर्वाहेणानुमित्यनुपपत्तिरतः परामर्शकालश्च सिध्धिसत्वे अपि परामर्श
द्वितीयक्षणे तदव्यवहितप्राक्क्षणवेत्यादि तदुपत्ति प्रकारस्याधस्तात् द्वितीयः एवं च सिषाधयिषापदं ततो पक्षः सिषाध
यिषाविरहपीयादिदोषादेव हेयइत्याशयः ननु सर्वत्रैव पुनरनुमित्सासत्वे मानाभावइत्यत आह तथेति अन्यथेत्यादि
त्यर्थः सत्यपि तस्यापि तथाचतादृशविशिष्टाभावानुमित्यकारणं विनानुपपत्तिरेव इति द्वितीयक्षणीयविशिष्टाभावस्यनु
भावनिर्वाहकानुमित्सोत्तरोत्पत्तौ तेनेकक्षणान्तरिताया अप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिरेव न तदनभि
धानेनन्यूनताः प्रथमकल्पे सिषाधयिषोत्पत्तिक्षणमारभ्यक्षणचतुष्टयात्मककालस्यैव विवक्षणीयत्वात्रिक्षणी

उरितानुमित्सास्थलेऽनुमित्यनिर्वाहश्चेतिदूषणद्वयानवकाशः एवंचानुमित्सोत्तरचतुर्थक्षणेपंचमक्षणेवाऽनुमितिरिति
ध्वेयं वाच्यासिषाधयिषापदेनविवक्षणीयास्याच्च योग्यताच स्वासहवृत्तरानुमितिरत्प्रागभावोत्तरानित्यर्थः स्वस्योत्पत्तिर्य
स्मादितिव्युत्पत्त्या स्वोत्पत्तिपदस्य स्वप्रागभावपरत्वादन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुपपत्त्या तद्द्वितीयक्षणेऽनुमि
तेरनिर्वाहात् । सिध्यनुत्पादः सिद्धिप्रागभावः तथाचस्वप्रागभावध्वंसविशिष्टविषयसिद्धिप्रागभावस्यानुमित्सायोग्यतेति
पर्यवसितं अनुमित्सापूर्वंतद्विषयीकृतसिध्यनंतरंचानुमितिः वर्णाय दलद्वयापादानं व्यानागतानं यावदनुमितीनाम
वऽनुमित्सा विषयत्वेसंभवेनस्व [illegible] कानुमितावुत्पन्नायां पिपासाविध्वस्तत्तत्प्रागभावसत्तादायोग्यताप्रसंगइतिना
ध्वंसस्वविषयसिद्धित्वावच्छिन्नप्रागभावस्य विवक्षितत्वात् अतएव स्वविषयेत्युक्तं यत्किंचिद्विशेषतत्तद्ध्वंसवतिकाले सामा
न्यधर्मावच्छिन्नप्रागभावासंभवेन सिद्धित्वावच्छिन्नप्रागभावस्यकदाप्यसत्त्वात् । सामान्यधर्मत्यप्रागभावप्रतियोगिता
वच्छेदकत्वानंगीकारेपुनः स्वविषयसिध्यसमानकालीनत्वमेव प्रागभावविशेषणंदेयं नह्यनुमितेर्घटानुमितिव्युत्पन्नायता
मित्सादीक्षानंतरंघटानुमित्सादिरूपविषयसिद्धावपिवह्न्याद्यनुमित्युत्पत्तिःकिंतुप्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्च

सार्थकं अनुमितोत्तरं दिवसादिवृत्तित्वेनापि अनुमितिप्रसंगात् इत्यन्वयः अंतरानुमित्युत्पादे स्वविषयसिद्धिसत्त्वाच्छिन्न
३९ प्रागभावाश्रयत्वेन योग्यताक्षणे नोत्पत्तिसंभव इत्यतो अंतरानुमित्यनुत्पाद इति द्वित्रिक्षणादिवृत्तित्वेनानुमितेः [illegible]रिष्टत्वा
दिवसादिवृत्तित्वेनेति सिध्यसत्त्वे अनुमितेरिष्टत्वादिंद्रियादिना निर्णीते [illegible] लिंगेन निर्णीते साध्ये जन्तरानुमित्यनुत्पा
द एव न संभवतीत्यत इंद्रियादिनेति आदिना शब्दादिपरिग्रहः अनुमितेः [illegible] (अनुमित्या अनुमितिक्षणो व्यवहितोत्त
रोत्पत्ति) क्षणमारभ्य क्रमेण पक्षविषयकलिंगज्ञानव्याप्तिस्मरणपरामर्शसत्त्वे तत्सामग्री तावत्कालेन परामर्
शोत्पत्तिः अनुमित्युत्पत्तिक्षणमारभ्य तत्क्षणपर्यन्तं यावन्तः क्षणाः तावन्मात्रक्षणाः तच्छायास्थूलकालः तत्समुदाय
एवमेयर्थः एवं च क्षणचतुष्टयं तदधिकरणक्षणानवरस्थायिस्थूलका[illegible] योग्यतेति पर्यवसितं तदनुगमस्तु प्राग
भावानधिकरणत्वस्वध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसाधिकरणत्वोभयसंबंधेन सिद्धा[illegible]यिषाव न
कालत्वेन न तदननुगतो [illegible] न तत्तत्कालत्वेन गौरवात् तत्तत्कालोत्तरजनकत्वापेक्षया न तत्सिद्धिभेदानामेव नि[illegible]ज्ञानोचिता
नुयोग्यतायाउक्तत्वं च तत्कल्पेऽपि वक्ष्यमाणाच्च पूर्वानुमितावलादनुमित्युत्तरमनुमि[illegible]प्रसंगस्यापाताच्च तत्रानुमितिक्ष

णास्यो तेजकताकल्पकाभावादितिध्येयं अनुसंतानंतरं यत्र वि[illegible] लिंगदर्शनादिकं ततश्च परामर्शः तत्रानुमितेरसत्त्वम्
णामारभ्य परामर्शपर्यंतस्थायी दंडादेरपीति तद्वारणाय लिंगदर्शनादेरनुमितांक्षणाव्यव[illegible]णोपात्तं [illegible]
मनुसृतं [illegible] यत्रानुमितेः सत्त्वे द्वितीयक्षणे पक्षलिंगव्याप्तिविषयकमेव स्मरणं तदनंतरक्षणे परामर्शोत्पत्तिस्तत्रैकक्षणव्यु
यमध्य एव परामर्श[illegible] तदनतिरिक्तका[illegible] तथात्वभ्रमवारणाय [illegible] अनुमितेः सत्त्वाद्वितीयक्षणयोर्लिंगलिंग
गदर्शनव्याप्तिस्मरणयोः क्रमेणोत्पत्तावपि कुत्रचित् स्मृतिविषयकाद्यत्र विलंबेन [illegible]निरूपणाधिकक्षणानामपि तथाविध
तयात [illegible]रणा [illegible]तादृशव्याप्तिस्मरणानंतरक्षणे परामर्शोत्पत्तावपि विरोधिनी यदर्थः अनुमितेर्न[illegible] गुणक्षण
व्यवधानविरहणपंचमक्षणे अनुमित्युत्पत्तेस्तत्र तु तदंशे पि तथाविधक्षणाव्यवधानादिरित्येतत्सूचनाय भंग्याभिहिता[illegible]कालविशेषा
पादानेभ्य[illegible]नानुतथाविधकालस्योत्तेजकत्वे गौ[illegible] तथा ह[illegible]अनुमित्सानाशे अनुमि[illegible]
तत्संतु ग्ध्येनेत्यर्थः[illegible]कालस्योत्तेजकत्वे [illegible] यत्र तथाविधपरामर्शोत्पत्तिक्षणे अनुमितिप्रति
प बंधकबाधादिसमवधानमात्रात्तदंग[illegible] मश्च तत्रासिद्धोसत्त्वात्तदनंतरं भेदानुमितिः प्रामाणिकी एवं यत्रानुमित्सादिती
यक्षणे लिंगदर्शनसामग्र्य[illegible]धानेन नंतरलिंगदर्शनादिक्रमेण [illegible]र्शोत्पत्तिस्तत्र सिद्धोसत्त्वात्मनंतरक्षणे

३६ अनुमितिर्वा तदोक्तापक्षया अधिकृत्य कालस्योत्तेजकत्वमावश्यकमित्याशयेनाह अनुमित्सात्व[illegible]मिति अनुमित्सोत्पत्तिक्ष
णमारभ्य तदुत्तरमित्यर्थः यावत्कालमध्ये अनुमितिर्जायेत इत्यग्रेतनेनान्वयः अनुमित्सोत्तरमनुमि[illegible] यादिवसा
दिविलंबेनापि सिध्यनंतरमनुमित्युत्पत्त्या तावत्कालस्या[illegible] अनुत्पन्नाप्यनुमित्सा प्रागनुमित्सायामसत्यामपीत्यर्थः अ
सत्यां सिद्धौ अनुमित्सोत्तरं दिवसादिविलंबेनाप्यनुमित्युदया[illegible]मिति प्राग्गत्यादिः यावत्काले न[illegible]या क्षणानंतर
न क्षणे [illegible] तावत्क्षणाधिकक्षणावस्थायी [illegible] अनुमित्सार्थकसिषाधयिषापदेन [illegible] विवक्षितः
अनुमित्सायोग्यतायाः उत्तेजकत्ववत्सिद्धियोग्यतायाः अपि तुल्ययुक्त्या प्रतिबंधकत्वमित्याशयेनाह [illegible] सिध्यनंतरं
इत्यपि शेषः तेन नास्यवैयर्थ्यं [illegible] द्विक्षणमध्ये त्रिक्षणमध्ये च [illegible] र्थः सिध्येश्चतुर्थक्षणे पंचमक्षणे वेति
पतितं [illegible] सिध्यर्थकपदेन [illegible] तन्नाशानंतरमपि द्वित्[illegible]यी त्रिक्षणावस्थायी वा [illegible]ः विवक्षणीयः
[illegible]नु सिध्युत्तरं कियत्क्षणमध्ये अनुमितिर्जायते कियत्क्षणानंतरं वा जायते इत्यस्य विशेष्यनिर्णेतुमशक्यत्वात् कालस्य
प्रतिबंधकत्वकल्पनमसंभवि एवमुत्तेजककालस्यापि विशेष्यनिर्णेतुमशक्यत्वात् तदुत्तेजकत्वमपि तथेत्यत आह [illegible]
[illegible] सावधानैः नियमः निर्णयः तथाच एषां विशेष्य तावत्कालानिर्णयो भवति तेषामेव तत्र विशेष्य प्रतिबं

धकसाध्युपगमोभविष्यतिअन्येषांतुसामान्यतएवेतिभावः कोचेत्तु ननु कालविशेषाणांसिध्धिसिषाधयिषाध्येकरण
कालत्वेनचेत्प्रतिबंधकोत्तेजकभावः तदाधिककालस्यापितथात्वप्रसंगः अननुगतधर्मोत्तरंच्छेदुर्वचमेव
स्यात्ाह विशिष्येति अननुगतविशेषणविशेषंनिवेश्यैत्यर्थः क्षणनियमः कतिपयक्षणानामेवतथात्वंनत्वधि
करणानामिति नियमानिर्वाहः अवच्छिन्ने निरुक्तिकुशलैः सिध्ध्याद्युत्पत्तिक्षणमारभ्यक्षणचतुष्टयादेःस्वप्रागभावा
वानधिकरणत्वस्यनाशाधिकरणसमयनाशाधिकरणसमयनाशाधिकरणत्वोभयसंबंधेनसिध्धादिमत्वमेवानुग न
मकमननुगमप्रसक्तं चेति नायद्यपि व्याप्यव्यापकेवदंती स्वस्वस्य च नाशस्य चोक्तरूपसंबंधेन मानाभावात्तत्तध्व
क्तित्वेनोत्तेजकत्वोपगमे उक्तदोषापत्तिरिति इच्छाया विषयसिध्धौ सत्यां चरितार्थतया नोत्तरकालमनुमितिर्जन्यतइति
